हादिसंगवोर्गुणदोषावाह प्राणान्मयान् भगवत्प्रियसंगेन समाहितमनाः प्राणवृत्त्या प्राणधारणमात्रेण पुष्कलवस्तु परिग्र
हेण परिशुध्यत्यर्थसिद्धिर्भगवत्कथाश्रवणाचार्यो पसत्त्यादिपुण्यादूरादनुसक्तो भवति न तु प्राइन्द्रियप्रियः शब्दादि

65 स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि मिथः शिवं धिया मनश्च भद्रं भजतामधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी
३ मागारदारात्मजवित्तबन्धुषु संगो यदि स्याद्भगवत्प्रियेषु नः यः प्राणवृत्त्या परितुष्ट आत्मवान् सिध्यत्यदूरान्न तथेन्द्रियप्रियः ४
भसंगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं हरत्यजो नः श्रुतिभिर्गतोंऽगजं को वै न सेवेत मुकुन्दविक्रमं ५ ॥

विषयप्रवणचित्तः सिध्यतीत्यर्थः ४ पुनः सत्संगतेः सिद्धिहेतुत्वमेव प्रपंचयति यत्संगेति येषां भगवत्प्रियपार्षदानां संगे
नैव लब्धं प्राप्तं निजवीर्यवैभवं मच्छिन्नतस्य भगवद्ध्यानसामर्थ्यं भगवत्प्रियसंगेनैवमपा लब्धमित्यर्थः तथा हितीर्थं गंगा
दितीर्थवत्पावित्ररूपं भगवद्यशः मुहुः संस्पृशतां सम्यग्वर्णयमानानां मानसं श्रुतिभिः श्रोत्रेन्द्रियैरेतः प्रविष्टो भगवानजे
जेमतोंगिति मलं हरतीति निर्मलं च मनः तद्ध्यानसमर्थमिति भावः यद्वा येषां भगवत्प्रियाणां संगात् लब्धं प्राप्तं निजवीर्यवैभवनि ६५
जन्याषो भगवत्पर्व भगवद्वीर्यवैभवं मुहुः संस्पृशतां पुंसो श्रुतिभिः श्रोत्रेन्द्रियव्यापारैः श्रवणादिभिरन्तः प्रविष्टो भगवान्मन
सेमनः संबाधिमलं हरति तत्र दृष्टान्तः यथा भगवच्चरणांबुजाद्गंगादितीर्थं संस्पृशतां मे गजं शरीरमलं हरतीति शेषं
पूर्ववत् अथवा यत्संगलब्धं निजवीर्यवैभवमिति तीर्थविशेषणं

अथ हरिवर्षे मेरोर्दक्षिणे उपास्योपासकोपासनाप्रकारानाह हरिवर्षे चेति नरहरिरूपेण नृसिंहरूपेण स्वेन सन्निहितो भवति त
द्रूपं नृसिंहरूपपरिग्रहे निमित्तमुत्तरत्र सप्तमस्कंधे वक्ष्यामि तद्दयितं तमं रूपं प्रह्लादस्तद्वर्षपुरुषैः सहाव्यवधानानन्यभक्तियोगेन
नो२ अव्यवधाऽविच्छिन्नः विघ्नानुपहतः अनन्यः न विद्यतेऽन्यत्फलं यस्य सः प्रयोजनान्तररहितः तेन भक्तियोगेन उपास्ते आरा
धयतीत्यर्थः प्रह्लादं विशिनष्टि महापुरुषो भगवांस्तस्य ये गुणास्तेषां भाजनोऽपि भगवद्गुणसमानगुणाकरइत्यर्थः महाभा
गतो भागवतश्रेष्ठः दैत्यानां दानवानां च यत्कुलं तत्पवित्रीक्रियते अनेनेति दैत्यदानवकुलतीर्थीकरणः एवंभूतं शीलरूपमा
चारो यस्य यद्वा उत्कृष्टं शीलं सद्वृत्तिः शौचाचमनसंध्यादिरूपमाचरितं आचारो यमदानमादिरूपश्च यस्य इदं वदयम।

शुक उवाच हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभा
जनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपा
स्त इदं चोदाहरति १ प्रह्लाद ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रंधय
रंधय तमो ग्रस ग्रस ॐ स्वाहा अभयमभयमात्मनि भूयिष्ठाः ॐ क्ष्रौं २ का२ ति२
सर्व२ एनमुदाहरति जपति १ इदमादि अमेवाह ॐमिति ॐ भगवच्छब्दा
र्थो पूर्ववत् तेजसामपि तेजसे तेजो हीरं प्रकाश्याणां सर्वतेजसां प्रकाशकाय इत्यर्थः तथा च श्रुतिः न तत्र सूर्यो भाति न चन्द्रतार
विर कं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति कठवल्ली [illegible] आपत्ते तद्रूपमेव चार्थे को परे
ग्रहस्ता [illegible] परब्रह्मस्त्वं विविक्ते आविराविर्भव आविः [illegible] निपातः प्राकट्य [illegible] ह्रदि विचने पु
नः पुनः प्रकटी भव इत्यर्थः वज्रवद् [illegible] नखदंष्ट्रे [illegible] कर्मवासनाः रंधय रंधय [illegible] दिवे
चनैर्भूयिष्ठा [illegible] कर्माशयानि [illegible] मम [illegible] यथा तथा
विर्भवेत्यनुषंगः [illegible] भूयिष्ठाः [illegible] अभयं [illegible]

एतेनात्र [illegible]

भा०पं०टी०

६६

तस्माद्भगवद्भक्तेर्निरतिशयसुखहेतुत्वाद्विषयासक्तेर्निरतिशयदुःखहेतुत्वाच्च रजआदीनां मूले संसृतिचक्रवाले संसा
रपरिभ्रमे सिद्धे तत्र इदं संसृतिर्जन्ममरणरूपा तस्या अपि चक्रवालं मण्डलमविच्छेदो यस्मात्तदङ्घ्रिं हित्वेत्यर्थः नृसिंहस्य पादं भजेत क
थंभूतमकुतोभयमदुःखेन कुतोपि भयमित्यर्थः तत्र रजः कामः विषयाभिलाषरूपः रागः कोपः विषयानुभवविरोधिवि
षयः विषादः विषयविहतिनिमित्तः शोकः मानमदःकार्यमहत्ताजन्यावमानहेतुः मन्युस्तज्जन्यः क्रोधः स्पृहा परधनादि
ष्वीप्सा भयमापत्तिम्दुःखहेतुदर्शनजं तज्जं दैन्यं म... वसादः आधिस्तत्कृता मनःपीडा ॥ ८ ॥ अथ केतुमालवर्षे उपास्योपास
कादीनाह केतुमालेऽपीति भगवान्कामदेवरूपेण प्रद्युम्नरूपेण केतुमालवर्षे आस्त इति शेषः किमर्थं लक्ष्म्याः प्रियं कर्तुमिष्ट
त्वा किंच प्रजापतेः संवत्सरस्य संवत्सरो वै प्रजापतिरिति श्रुतेः स एव तद्दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा अहरभिमानिनो

तस्माद्रजो रजोविषादमन्युमानस्पृहाभयदैन्याधिमूलं हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजतोऽकुतोभयमिति ॥ ८ ॥ श्री
शुकः केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितृणां पुत्राणां च तद्वर्षपतीनां पुरुषायु
षाहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसा उद्विग्नमनसां विध्वस्ता व्यसवः संवत्सरान्ते निपतन्ति ॥ ९ ॥

देवाः केतुमालवर्षाधिपतयः तासां तेषां च पुरुषायुषा अहोरात्रसंख्यातानां पुरुषस्यायुः पुरुषायुषं अचतुरोऽविचतुरस्या
दिनानि पाठान्तरे तासां तेषां एकपुरुषायुषवर्षशतमहोरात्रमहोरात्रसंख्यानीत्यर्थः परिसंख्यानेन गतानि येषां ते तथोक्ताः
अहन्यहनि अहोरात्रे अहः सर्वैकदेशसंख्यानपुण्यान्तरास्त्रिंशत्समासां तासां प्रत्ययः पुरुषाः पुरुषपरिमाणकमहोरा
त्रं येषामित्यर्थः षट्त्रिंशत्सहस्रं वर्षपरिमितायुषां त्वामितियावत् तेषां प्रियचिकीर्षया च यासां प्रजापतेर्दुहितृणां अ
भिमानिनीनां देवतानां कथंभूतानां महापुरुषस्य भगवतो महास्त्रस्य चक्रराजस्य तेजसा उद्विग्नितभीतमनसां तासां
गर्भाः संवत्सरान्ते गर्भाधानादारभ्य संवत्सरान्ते विध्वस्ता विस्रस्ता अत एव व्यसवः विगतप्राणाः सन्तो निपतन्ति ॥ ९ ॥

६६

6.6

वीर्यैर्भवः प्रभावातिशयो यस्य तस्याद्भुतं मुकुन्दस्य विक्रमं मुकुन्दः संस्पृशतां श्रुतिभिरन्तर्गतं मानसं मलं हरति यथा तत्तथा।
देवुजतीर्थे गंगाजं मलं इति वा योजना अत्र न संबन्धस्तत्र तं मुकुन्दविक्रममित्यध्याहारः तत्संस्पृशतामित्यनेनान्वितत्वा
दावृत्तिर्वा मुकुन्दविक्रमस्याध्यापीजनानां तु तीर्थपदस्य गोपाल कृत्वा भगवच्चरित्रं सिवृत्तिः अगम्या च स्यमनः परत्वं च द्विती।
यो जनानां तु न कोपि दोषः एतत्संगतैर्भगवच्चरित्रैः श्रुतानां तैरपि मनोनैर्मल्यं तल्लक्षणं भगवद्ध्यानसामर्थ्यं तत्तत्र भगवदुपास
नात्ततोपि च सिद्धिरिति प्रणाडी दर्शिता भवति ५ इदानीं भगवद्भक्तिं प्रशंसति यस्येति अकिंचना नास्ति किंचन यस्याः सा
किंचिदैहिकामुष्मिकं च फलमनवलम्बमाना भवेगतिर्भक्तिर्यस्य पुंसोऽस्ति तत्र भगवद्भक्ते सर्वदेवा इन्द्रादयः सर्वैर्गुणै
र्धर्मादिभिः ज्ञानदमादिभिश्च सह समासते तमेवानुवर्तन्त इत्यर्थः एवं भक्तस्य सद्गुणा अप्रयत्नमुक्ताः अभक्तस्य दुर्गुणा अपत्ला
भावमाह हरौ भगवत्यभक्तस्यात एवासति गृहादौ मनोरथेन बहिर्धावतः विचित्ततः महद्गुणास्ततो भगवद्भक्तौ नापेक्षु।
यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः
६ हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितं हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनां ७
एतत्काले कुतः कस्माद्धेतोर्भवेयुः अतोऽभक्तस्य न महद्गुणा अपत्यमित्यर्थः ननु विषयासक्तोऽपि कश्चिल्लोके म
हानेव दृश्यते अत आह हरिरिति यथा झषाणां मीनानां ईप्सितं तोयं जलमेवार्तं धारकं तेन विना जीवनाभावाच्च तथात्र
शरीरिणां साक्षाद्भगवानेवात्मा धारकः तथाच श्रुतिः को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादिति आनन्दरूपः सर्वप्र
कारकः परमात्मप्रतिपादिनः सर्वान्तोपासितः स्यात्तदा को ह्यन्यादैहिकामुष्मिकसुखसंपादनेन जीवयेत् को वा प्राणपादयेत्
ऽधिकसुखसंपादनेन जीवयेदिति श्रुत्यर्थः तथा [illegible] च स्मरति भगवान्वाल्मीकिः न च सीता त्वया हीना न चाहमपि राघव
मुहूर्तमपि जीवामो जलान्मत्स्याविवोद्धृतौ इति यस्मादेवं तस्मात्तं भगवन्तं विहायेत्यर्थः तदा दम्पती नो वयसा महत्त्वं।
व मुहूर्तमपि जीवा मो जलान्मत्स्याविवोद्धृतौ इति यस्मादेवं तस्मात्तं भगवन्तं विहायेत्यर्थः तदा दम्पत्योः नो वयसा महत्त्वं
न तु स्नानादिभिरित्यर्थः मिथुनीभूतानां यद्वयः आदिभिर्निर्वृत्तः दारिकोऽनन्तो निरतिशयः सुखहेतुः सुखलेशः तत्कृतमेव
तेषां महत्त्वं न तु निरतिशयानन्दप्रापकं स्वतस्मपरमात्मयाथात्म्यानुभवकृतमिति भावः ७

जगत्कारणत्वमाह छंदोमयायछंदःप्रभुवाय तस्यप्रवाता तस्यमहतो मूलस्यानिःश्वसितमेतद्यदृग्वेद इतिश्रुत्यर्थोत्रविव।
दितः एवंसमष्टितत्वशरीरकत्वमभिधाय व्यष्टितत्वात्मकत्वमाह अन्नमयाय अन्नमयश्चासौ ऽत्रव्यष्टयात्मकस्य तत्व
संघातात्मकदेहपरः तद्रूपाय व्यष्टिशरीरकायेत्यर्थः एवं व्यष्टिसमष्ट्यात्मकतत्वान्तरात्मकत्वमभिधाय जीवान्तरात्मत्व
मपिसामानाधिकरण्येनाभिधत्ते अमृतमयायेति अमृतशब्दोत्रजीववाचीपरमात्मपर्यंतः अमृतशरीरकायेत्यर्थः
उक्तानुक्तकालाद्यंतरात्मत्वाभिप्रायेणाह सर्वमयायेति सर्वात्मकायेत्यर्थः किंबहुनातत्तद्वस्तुगततत्तदाकारस्यरूपत्वमेवेत्याह स
इसमनःसामर्थ्यरूपाय ॐजसे इंद्रियनृक्तिरूपायबलाय देहस्थितिरूपायसह आर्य हेतुत्वात्तत्तदात्मप्रयुक्ताः कान्तायनि
रतिशयप्रीतिविषयाय कामाय स्त्रीयेपुनिरतिशयप्रीतिविशिष्टायतेन्नमममभयत्रपुरस्तात्पृष्ठतश्चनमो नमं भूपादित्यस्य

६७

छंदोमयायान्नमयायामृतमयाय सर्वमयाय इदंबेरोॐजसेबलायकांतायकामायनमस्तेऽभयश्चभूया
त् ११ स्त्रियोवृते त्वाहृषीके श्वरंस्वतोह्याराध्यलोकेपतिमाश्रासते ऽन्यं तासांनतेवैपरिपांत्यपत्यं
प्रियं धनायूंषियतो ऽस्वतंत्राः १२

त्यर्थः ११ एवमिमंमंत्रमुदाहृत्यैतीतिपत्नीलक्ष्मीः पतित्वप्रवृत्तिनिमित्तयोष्कल्यविशिष्टत्वमेवेत्याह स्त्रियइति स्वतः इ
षीकाणामिंद्रियाणामधीश्वरमधिपतिं स्वतः शब्देनाधिपत्यस्यनिरुपाधिकत्वमुच्यते एवंभूतंत्वां व्रतैराराध्य लोके।
संसारे स्त्रियः अन्यंपतिमाशासते कामयंते तेच आराध्यमानाः पतयः तासांकामयमानानां स्त्रीणां प्रियं प्रीतिविषयमपत्यंआ
त्मापत्यधनायूंषि चनपरिपांति नरक्षंति पातुमसमर्थत्वादितिभावः तत्कुतः पत्तयः तेपतयः अन्यतंत्राः कर्मवश्याः तेषाप
तित्वादिकमौपाधिकंनहिकर्मपरवशाः कर्मनिर्देशेसमर्थाः न्यत्रपतिनान्यो ऽमुख्यवृत्त इत्युक्तं भगवतित्तुमुख्यवृत्त इत्याह

अतीवेति तत्र रमोल्लक्ष्मी रमयाऽनुद्रियाणि रमयते केन साधनेन रमयन् तदाह अतीवसुललितया सुंदरया गत्या यो विला
सस्तेन विलसितो हसितं रासलेशो मंदस्मितं [illegible] तस्मिन् सौलोकवलीलालतया किंचिदुत्तंभितं उत्तुंगितं सुंदरं पद्मं मंडलं
तेन सुभगे यद्वदनारविंदं तस्य श्रियाऽऽश्रेमया भगवतस्तन्मायामयेन मायाप्रचुरमाल्पीपर्यंकलेन परिगृहीतमित्यर्थः ज्ञानप
यो यो ऽत्र मायाप्राद्यं रमालक्ष्मी देवी देवस्य भगवतः संबोधि [illegible] योगादाख्यापामि तिडीप् संवत्सरस्य रात्रिषु प्रजापते दुहितृ
भिः रात्र्यभिमानिनीभिर्देवताभिरुपेता सा तौ संवत्सरस्याहस्सु च तद्भर्तृभिः रात्र्यभिमानिदेवतामते भिर्दिवाभिमानिभिर्देवैरु
पेता परमेणासमाधियोगेन उपास्ते १० इदं वदपमाणं मंत्रवाक्यं चोदाहरति जपति बहुवचनं संवत्सरदुहितृतद्भर्तृभिप्रा
यकं जप्यमंत्रमाह ओं भगवन्नकृष्णपदा यो पूर्ववत् कामीकाणार्ण्डिपायाणड्नापनि पंचसर्वैः प्रकृतिपुरुषयोरसंभावनीयैर्गुण

१।१ विशेषैः सत्यत्तानादिभिः गांभीर्यादिभिः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसइत्यादि श्रुतिप्रसिद्धैर्विवदितमायपल्ले

अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनार
विंदश्रिया रमया रमयन्निंद्रियाणि रमयते तद्गता मायामयरूपपरमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापते
दुहितृभिरुपेताहस्सु च तद्भर्तृभिरुपास्ते १० इदं चोदाहरति ओं ह्रां ह्रीं ह्रूं ओं नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्वि
लक्षिताय समने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय

नयत्कं प्रतिपादयितुमिष्टमात्मस्वरूपं य
स्मात्तस्मै कल्याणगुणाश्रयत्वेन वेदोक्तैः प्रतिपाद्यमानायेत्यर्थः सर्वत्राधिकरणार्थोऽत्रानुसंधेयः आकूतीनां क्रियाणां चि
त्तीनां ज्ञानानां चेतसां संकल्पाध्यवसायादीनां कर्मेन्द्रियज्ञानेन्द्रियमनसां व्यापाराणां विशेषः पृथिवी बहुवचनमाकाशाद्य
भिप्रायकं पृथिवीप्रभृतिपंचमहाभूतानां चाधिपतये नियंत्रे इदं चाधिपत्यं न सत्यपि [illegible] निरूपितं नियंतृत्वमा
चस्य रक्तः इव अपित्वा [illegible] इति द्योतयितुं शरीरकभावनिबंधनसामानाधिकरण्यमाह सो ऽं कलायेति षो
ऽशकलाः पंचभूतानि मनः [illegible] एतत्स्वरूपाय तच्छरीरकत्वेनावस्थितायेत्यर्थः षोडश कला
ः मूर्तयो यस्येति बहुव्रीहिः १।२

भा० पं० टी०

६४

ननु लक्ष्मीर्हि लोके पुरुषार्थत्वेन प्रसिद्धा न त्वं अतः कथमेवमुच्यते तत्राह मत्प्राप्तय इति ऐन्द्रिये ग्राम्ये सुखे धीर्येषां तथाभूताः के कालवदलुक् समासः अजो ब्रह्मा ईशो रुद्रः सुरा इन्द्रादयः असुरा मयप्रभृतयोऽपि मत्प्राप्तये मां प्राप्तुं भवत्पादपरायणात् ऋते भवत्पादारविन्दशरणान् वर्णान् विनाऽन्यादृशस्तपः तप्यन्ति पाकं पचतीतिवन्निर्देशः तपः कुर्वन्तीत्यर्थः तथापि मां न विन्दन्ति न प्राप्नुवन्ति कुत हे अजित यतोऽहं त्वद्धृदया त्वय्येव हृदयं यस्याः पृथक्सिद्धत्वेन मम त्वद्धृदयत्वं तत्त्वेनैव पुरुषार्थरूपत्वं न तु पृथगित्यर्थः यद्वा त्वं निरतिशयपुरुषार्थरूपस्त्वं हृदन्तोपस्याः तथाभूता अहं त्वय्येव हृदयं यस्याः सेति निरतिशयपुरुषार्थरूपस्य तव नित्यसम्बन्धत्वेनाहमपि पुरुषार्थरूपा भवामि न तु स्वतन्त्रेत्यर्थः अहो अपि भवत्पादारविन्दपरायणास्तानेवाहमनुवर्तयामीत्यभिप्रायः १५ इदानीं तत्कृपापात्रं यियाचिषते स त्वमिति पुरुषार्थरूपः स त्वं हे अच्युत वन्दितं सर्वै

मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रियेधियः ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित १५
स त्वं ममाप्यच्युत शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्वतां बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति

68

पुरुषार्थप्रदत्वेन स्तुतं तत्कराम्बुजं मम शिरसि निधेहि कथंभूतं यत् सात्वतामेकान्तिनां शीर्ष्णि अधायि कृपया निहितं मत्पूर्वै र्लक्ष्म्या विषया त्वमपि पूर्वं किमिदं प्रार्थ्यते तत्राह हे वरेण्य मायया मायामपरूपेण श्रीवत्सेन स्वरूपचिन्हं लक्ष्म मां बिभर्षि च
मकलैं लक्ष्मरूपेण यां बिभर्षीत्यर्थः श्रीवत्सस्य प्रधानो[illegible] श्रीवत्सस्थानमपरमनेनेन समस्याश्रितत्वप्रधानबुद्धिरप्यासीत्संवादरूपेण मा धवमिति भगवत्ता परानारोपोक्तं माप्येति स्वार्थं यथा श्रीवत्सं [illegible] लक्ष्म तथाहमपि लक्ष्म अतः सा त्वत्[illegible]मपि कृपास्त्वित्य[illegible]भिप्रायः प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः इति [illegible] ते त्वात्मैव मे मतमित्युक्तेर्भगवदभिप्रायमालोच्य श्रीशिसाल्यत्वां यदधायीत्युक्तं अत्र कारणं न कोपि वेत्तुं प्रभुरित्याह ईश्वरस्य तव ईहितं चेष्टितं [illegible] अभिप्रेतं वा ऊहितुं तर्कयितुं को वा प्रभुः समर्थः न कोपीत्यर्थः १६

विषयेण:

६८

७१

सर्वाइति सः मंत्रोक्तगुणसंपन्नः भवान्पतिर्वै वेशरोदेव धारणे भवानेव पतिरित्यर्थः तथा च श्रुतयः एष सर्वेश्वरः एष भूता
धिपति एष भूतपालः पतिं विश्वस्यात्मेश्वरं न तस्य कश्चित्पतिरस्ति लोके इति सूत्रं चैतद् द्विषपक्षं अनन्याधिपतिरिति कु
तोभयनिरुपाधिकं पतित्वं तत्राः अकुतोभयः नास्ति कुतोपि भयं यस्मात् कुतोभयः अकर्मवश्यत्वेन कर्मकृतपारतंत्र्याभा
वान्निरुपाधिकस्त्वं तस्य स्वयं वेति भावः अंतएव भयातुरजनसंभ्रमतः पाति सर्वेभ्योपि भयेभ्यः आपत्ते सच निरुपाधिकः
पतिर्भवानेक एव इतरथा ईश्वरद्वित्वे मध्ये ईश्वराणामितरेतरं विरोधादन्योन्यभयं स्यात् यतो भवानेक एव पतिरतो विभावात्मनो
लाभात्परमन्यदधिकमधिकं न मन्यते आत्मनो लाभः परमात्मलाभः तस्मान्न तस्मिन्नेव किमस्यात्मनः स्वतः इतरस्यास्त्याप
हैवतन्मात्रमेव चैतन्न संस्कृताणे भवानपवर्तनं तु ततोन्यादि त्यर्थः तदेव प्रपंचयति यदि अखिलेषु कामेषु पत्यपत्य धना।

सैवपतिः स्यात् कुतोभयः स्वयं प्रसमे ततः पाति भयातुरजनं स्वाकारवेत्तरस्याभिप्रायो भयेनैवा स्मत्ता भादिभिर्विमन्यते परं १३ पाल
स्यते पादसरोरुहतीर्थेन कामपत्यसाः अखिलकामप्रलंपरा तदेव राशीप्सितमीप्सितोर्थं चितोयद्ग्रपाणा भगवन्प्रतप्यते १४।

दिषु लंपटा आसक्ता सती पाणौ तस्याः कविधप्यते तव पादसरोरुह योरर्चनमासाद्य धनेन कामयेन्न कुर्यात् तस्याः तदेवेप्सितेप
त्यपत्यादिकं तुच्छं फलमर्चितस्त्वं राशीसिद्दाति रादानेइति धातुः कथंभूतः त्वं ईप्सितः प्रीतिविषयः पुरुषार्थरूपः सर्वो वि
धपुरुषार्थरूपत्वात्मयपुरुषार्थरूपमत्वात्व तो न यत्किंचित्पुरुषार्थत्वतः प्रार्थ्यते तस्यास्तदेव पुरुषार्थो भासदराशिनतु
त्वात्मनेइत्यभिप्राये यतस्त्वत्तोन्यत् पुरुषार्थरूपमत एव भग्नापाङ्ग्याया चितार्थी यस्यास्तथाभूता सती हे भगवन् कामदेव
प्रतप्यते दुःखिता भवति ननु लब्ध्वापि तं वनितरां सुरवीत्यभिप्रायः ईप्सितार्चितमिति पाठांतरं तदा इप्सत्वेन पूजितं तवप्रक
तं ईप्सितमिति यावत् तुच्छपुरुषार्थरूपमपि निरतिशयपुरुषार्थरूपत्वेन मन्यमानं पत्यपत्याद्यन्यत् प्रमेसंसारिकमेव फलं
रासीत्यभिप्राय

भा०पं०टी०

६५

भवानीति ऊर्मिमालिनि उच्छलत्तरङ्गपङ्क्तिपुञ्जेषु गोत्रार्णवकस्मिंश्चिद्देनंदिनप्रलयपालिवेउ षधीनावीरुधां गुल्मानां च निधि मध्यपभूता इमां द्वोणीं भूमिं मया मनुना सह च स्थिति रोषवाभवानोजसा उर्वीधिकं विक्रमते विचरतीति यद्वा पालुमित्यस्यानु षंग द्वोणीपातुं क्रमते उत्सहते इत्यर्थः यतोऽजस्त्वं यद्वा हे उरुक्रमते हे जसाहे ओरूपेण संकल्परूपज्ञानात्मकेन ओजसाव लेन न तु साधनान्तरेण मां द्वोणीं रक्षितवानित्यन्वयः हरः उवाह धृतवानित्यर्थः तस्मै जगत्प्राणगणात्मनेनमः जगत्प्रा णगणाः प्रतिचारी रेप्राणाख्याविगणाः तदेवरारमनइत्यर्थः जगत्प्राणगुणात्मनशरिपाठे तु जगत्प्राणात्मरूप गुणस्वभावापेक्ष थी २२ अथ्यदेहएवं वैपदर्थउपास्योपासनादीनाह हिरण्मय इति भगवान् कूर्मरूपं बिभ्राणो हिरण्मये वर्षे निवसति तस्य भगव

भगवान्युगोऽत्रार्णव ऊर्मिमालिनि द्वोणीमिमामोषधिवीरुधां निधिं मया सहोरुक्रमतेऽजउज सातस्मैजगत्प्राणगणा त्मनेनमइति २२ श्रीशुक० हिरण्मयेपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमासह वर्षपुरुषैः पि तृगणाधिपतिरुपधावति मं त्रमिमं चानुजपति २३ ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशेषणायानुपलक्षितस्था नाय नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्त इति २४

तस्तोपि प्रियतमां कूर्मतनुं पितृगणानामधिपतिरर्यमा तद्वर्षस्थैः पुरुषैः सहोपधावति अनुवर्तते उपास्ते इत्यर्थः शेषंपूर्वव त् २३ अकूपाराय कूर्मरूपाय कुत्सिताः स्वल्पा आपो यस्मिंस्तत्कूपं स्वल्पाम्भ पतया तद्यन्नपारद्याति स्वीकरोतीति कूपारः सर्वसत्वाजं तवः गुणास्तदन्ताहेयाः कल्याणा ज्ञानश्वाक्ति बलैश्वर्यादयः तैर्विशेषणानि सद्यारकाण्यद्यारकाणि च प्र कारभूतानि यस्य तस्मै तत्र सर्वसत्वानां कल्याणगुणानां च सादाधिविशेषणं त्वं सत्वगतगुणानां सत्वद्वाराविशेषणं मि तिविवेकः अनुपलक्षितस्थानायाहः समुद्रे मंदरमूले स्थितायेत्यर्थः अवर्ष्मणो प्राकृतदेहरहितायवर्ष्मणोऽस्त्य प्राकृत दिव्य देहाय वर्ष्म शब्दोदेहियर्यायः कृतः वर्ष्मणो अपि वा अतिवा गरीयसे वा गरीयस्त्व च कालानवच्छेद्यत्वभूम्ने महिमवते अवस्था

एवं केतुमाले उपास्योपासकादिकमुक्त्वा अथ रम्यके तदाह। रम्यके चेति प्राग्युगोत्तसमये मनोरम्यकवर्षाधिपतेः प्रदर्शितं तय न्मात्स्यं रूपं भगवतः प्रियतमं तदेव रूपं स एव मनुः रम्यकवर्षे इदानीं महत्ता ऽविच्छिन्नेन भक्तियोगेनाराधयन्नास्ते ७ मंत्रमा ह ॐ मिति सत्त्वाय शुद्धसत्त्वमूर्तये मुख्यतमाय मुख्यः तस्मै प्रथमावताराय वेत्यर्थः प्राणाय जीवयित्रे प्राणाय प्राणवत्तराय मनेवाङ्ओजसे इंद्रियबलाय धिषणाबलाय शरीरे बलाय धिषणा तत्तदवताराणां धारणगुणाः सर्वेत्रोपास्यार्थे मंत्रे मुक्ताः एवंभूताय महते मत्स्याय महामत्स्याय नमः १८ कस्मात् चिदचिदात्मकजगन्नियंतृत्वरक्षकत्वविशिष्टं स्तुवंति अंतरिति लोकपालैरंत र्वहिश्च अदृष्टरूपो यस्य उरुर्वाधिकः स्वनो वेदात्मिको नादो यस्य तथाभूतस्त्वमीश्वरस्तव कोसावीश्वरस्तत्राह यइदं विश्वं चिद चिदात्मकं कृत्स्नं जगद्विधिनिषेधरूपवत् तन्मूले नम्राम्नादिना आत्मनो ऽनयन्नीतवान् नयनं चात्र नियमनपूर्वकं रक्षणं यथा

श्रीमूक० रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनारा धयन्निदं चोदाहरति ७ ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे बलाय महामत्स्याय नम इति १८ मनुरु० अंत र्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियं १९ यं लोकपा लाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक् समेत्य च पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते २० ॥

दारुमयीं दारुविकाररूपां स्त्रियं स्त्रीप्रतिकृतिं नरः स्ववशीकृत्य नाटयति तथेति अनेन कृत्स्नजगन्नियंतृत्वकथनेन का रणत्वमप्युक्तं कारणत्वेनैव तत्त्वपारेकगत्वादेव सर्वभूतान्तरात्मा ऽपहतपाप्मा दिव्यो देव एको नारायण इति श्रवणात् स र्वभूतान्तरात्मेत्यनेनैव तत्त्वं चोक्तं एको ह वै नारायण आसीदित्यनेन संवादात् इत्यर्थः १९ इदं जगन्नियंतृत्वादिकम न्यसाधारणमित्याह यमिति मत्सरज्वरं मत्सरः परोत्कर्षासहिष्णुत्वं स एव ज्वरः तं हित्वा ऽपि पृथक् समेत्य संघीभूयापि वा यतंतोऽपि लोकपाला इन्द्रादयोऽपि पञ्चजातीयैः रक्षितुं न शेकुः न प्राभवन् प्रपंचं किं तिन्नाह पदद्वयं पतत्रिपक्ष्यादिरूपे चरिष्णुस्था स्नुपर्वतादिरूपं स्थावरजातं च आत्मप्रपंचे दृश्यते तं पातुमित्यर्थः २०

५२

तं २

तं २

भा०स्कं०८ी०

एवं विश्वरूपत्वमनन्तत्वं चोक्तं यतो विश्वरूपस्त्वमत एव द्यौः खमित्यादिशब्दैः भवानेवा[illegible]भिधीयत इत्याह जरायुजमिति
हे देव चराचरभेदेन द्विविधं पुनर्जरायुजादिभेदेन चतुर्विधमेतज्जगत्तव विभूति[illegible]विशेषरूपमित्यर्थः अ
तव द्यौः खमित्याद्य[illegible]भिधेयः त्वमेक एव द्यौरादिशब्दैरभिधीयमानस्त्वमेवेत्यर्थः अनेन जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरवाणि तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुत्युक्तविधया नामरूपतद्रूपत
द्बुद्धीनां परमात्मपर्यन्तत्वसिद्धेः द्यौरादीनां परमात्मशरीरत्वाच्छरीरवाचिनां शब्दानां शरीरिपर्यन्ताभिधानस्य गवा
दिशुक्लादिशब्दानां गुणाद्याश्रयपर्यन्ताभिधानवदाकृत्यधिकरणन्यायसिद्धत्वाच्च द्यौः खमित्ये
करूपेण त्वमेव वाच्यो बोध्य इत्यभिप्रायः २८ एवमनन्तविविधविभूतिमत्त्वेन तु संख्यानपरस्यास्तीत्याह तदुक्तं

७०

जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देव विभूतिभेदं द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः
२८ यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयं ॥

70

तदुक्तं पृथिव्यादितत्त्वानां चतुर्विंशत्यादिसंख्यावच्छिन्नत्वादत्त आह यस्मिन्निति असंख्येयान्यनन्तत्वात्परि
च्छेत्तुमशक्यानि विशेषाणि विलक्षणानि देवादिनामानि रूपाणि चाकृतयश्च यस्य रूपशब्देन पृथिव्यादिद्रव्यं।
विवक्षितं तत्संस्थानमाकृतिशब्देन तद्वाचकशब्दो नामशब्देन विवक्षितं असंख्येयविशेषनामाकृतिरिति पूर्व
त्र बहुव्रीहिः उक्तानि नामानि रूपाण्याकृतयश्च यस्येति वा एतदेव प्रकृतिपुरुषकालशरीरकेऽसंख्येये त्वयि भवे
त्वयी [illegible] पंचचतुर्विंशतिः पंचविंशतिरित्यादिसंख्या कविभिः कपिलादिभिः पृथिव्यादितत्त्वयाथात्म्य
विद्भिः कल्पिता मन्दबुद्धीनां सुखग्रहणाय संकलय्य संगृह्य प्रदर्शिता वस्तुतः पृथिव्यादीनामपि चेतनतत्त्वा
नामनन्तानान्तरभेदानां च परमात्मन एवासंख्येयत्वमेवेति भावः

४५ पंक्ति २

विश्वस्य ध्यानेनत्यादिगुणाविशिष्टोऽसौ इति यद्रूपमिति एतज्जगत्त्रयस्य स्वरूपं शरीरं तस्मै व्यवसायरूपिणे नमः इत्यन्वयः व्यवसायरूपिणे
सम्यग्ज्ञानप्रवर्तकायेत्यर्थः यद्वा व्यवसायो ज्ञानं तत्संकुचितपरिच्छिन्नं ज्ञानं तदेव रूपमाकारस्तद्व्याप्तीति तथा तस्मै नमस्ते
व्यपदेशरूपिणे इति पाठान्तरं तत्र व्यपदिश्यते इति व्यपदेशाः वाग्व्यवहारार्हाः देवमनुष्यादिनामरूपात्मकः प्रपंचः स जगदेवरू
पं तदस्यास्तीति तथा न च यद्रूपमित्यनेन पौनरुक्त्यं व्यपदेशरूपिणे इत्यस्यैव पदार्थकत्वात् श्लोकद्वयस्य अव्यपदेशरूपिणे इति
वा छेदः अव्यपदेशो चेतनसजातीयत्वेन व्यपदेष्टुमशक्यं रूपं तदस्यास्तीति तं तस्मै तत्प्रश्च निर्दिष्टं जगद्विशिनष्टि निज
मायया अर्पितं प्रकृत्या निवर्तितं अर्थस्वरूपं भोग्यत्वेन प्रतीयमानं बहुरूपं स्फुरितं तत्र ज्ञानादिगुणादिनिरूपणं एवंविधं जगत्त्रयस्य
रूपं यस्य च संख्यापरिच्छेदो न कुतः अप्रथोपलम्भनात् प्रथा व्याप्तसाकल्येन उपलम्भाभावात् यस्य त्वनेन जगद्व्यपरामृ
श्यते यस्य जगतः संख्याप्रकारो नास्ति कुतः अप्रथो लम्भनाद् वृक्षात्मकत्वेनोपलम्भनात्

यद्रूपं मत्तन्निजमायया अर्पितमर्थस्वरूपं बहुरूपरूपिणे संख्यानं यस्यास्त्यप्रथोपलम्भनात् तस्मै नमस्ते व्यवसायरूपिणे ॥ २६

विशुध्यामवृत्तात्मकत्वेनोपलम्भात् यद्यपि जगत्प्रतीयते एवं तथाप्यविशुध्यामवृत्तात्मकत्वेन तत्प्रतीतिः तीत्य
भिप्रायेण संख्यानं यस्यास्तीत्युक्तं यद्वा यस्य जगतः अप्रथोपलम्भनात् संख्यापरिच्छेदो नास्ति अप्रथोपलम्भनात् साकल्ये
न उपलम्भनाभावात् कोटिशो ब्रह्माण्डानि इति जगतो ध्यानेनत्यादिनिभावः यद्वा यस्य जगतः अप्रथोपलम्भनादप्रार्थ
त्वेनोपलम्भनात् मायार्पितत्वात् अर्थस्वरूपत्वं बहुरूपरूपित्वं भगवच्छरीरत्वादि चौ ये केनोपलम्भात् संख्याप्रकारो ना
स्ति जगद् उत्ताकारविपरीताकारोपलम्भो भ्रमरूप इत्यर्थः २६

तत्व५ तत्व४ तत्व४ त२

अथोत्तरकुरुषु यागादिकमाह कुरुष्विति कृतवराहरूपेण तावद्गो भगवान्वाराह एव मूर्तिः यज्ञपुरुषः यज्ञशरीरकः
तदा तस्य सत्कलत्रं आस्ते तं तु वराहरूपं भगवन्तं एषा भूर्देवी कुरुभिः कुरुवर्षस्थैः पुरुषैः सहास्खलितभक्तियोगेन
विच्छिन्नभक्तियोगेनोपधावत्यनुवर्तते भक्तियोगेनाराधयतीत्यर्थः इमां वक्ष्यमाणां परमां श्रेष्ठामुपनिषदमावर्तयति
जपति ३० ॐ भगवदर्थाः पूर्ववत् मन्त्रतत्त्वलिङ्गाय मन्त्रप्रतिपाद्यं वासुदेवलिङ्गं शरीरं यस्य यज्ञमन्त्रतत्त्वस्य स्वरूप
स्य लिङ्गं ज्ञापकं यस्य मन्त्रलिङ्गं मन्त्रतत्त्वलिङ्गादित्वे लिङ्गं शरीरं ज्ञापकं वा यस्य तिवा यज्ञमन्त्रगतानि तत्त्वानि द्रव्य
स्वरूपाणि तानि लिङ्गानि शरीराणि यस्य स्मैतयज्ञक्रतवे अग्निष्टोमादयः क्रतवः क्रतवं तदुभयाय तदेव रागस्त्वातर
राध्यत्वात्सफलदत्वात्स्थूलत्वात् बिलक्षितं महाध्वरावयवभूताय यस्य यज्ञाः एव रस्यावयवाः स्रुक्स्रुवेत्यादयः म
हात्मस्वरूपस्य तुण्डादिरूपत्वेन भिरनुसन्धेयायस्य तस्मैरित्यर्थः तथाचोक्तं तत्रापि स्रुक्तुण्डः आसीत्स्रुव ईशनासयोरिडोद
रे चमसाः कर्णरन्ध्र इत्यादिना महापुरुषायवेदप्रमेयपुरुषमहात्मादित्यवर्णं तमसः परस्तादिति पुरुषसूक्तप्रतिपाद्यत्वं

श्रीशुक० ३ तेरषु च कुरुषु भगवान्यज्ञपुरुषः कृतवाराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगे
नोपधावतीमां च परमामुपनिषदमावर्तयति ३० भूमिरु० ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय
महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते इति ३१

गत्कारणत्वाचनंतकल्याणमहागुणविशिष्टायपुरुषाय
सर्वान्तरात्मने कर्मशुक्लाय कर्मणा शुद्धाय विशुद्धं शुक्लं कर्म संहति प्रतिभटकर्मणोऽहितायवन्नतु कर्मरहितायेत्यर्थः
सर्वान्तरात्मने कर्मशुक्लायेति सज्जातीयविजातीयावधिकसर्वकर्माभ्यपत्वमत्र वर्णात् निष्क्रि
सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस इति देवमनुष्यादि सज्जातीयविजातीयावधिक
यनिष्कलमित्यनेन बन्धकर्मानाम्नपत्वमुच्यते त्रियुगाय कर्मशुक्लायापि त्रियुगाय षाड्गुण्यपूर्णाय त्रीणि युगानि द्वा
न्द्वान्याद्दीनि यस्य तस्मै यद्यपि भगवतः स्वरूपेणापि षाड्गुण्यपूर्णत्वात् कर्मशुक्लायेत्यनेनाक्रियाभ्यपत्वकथनप्रपुन
ज्ञानस्य वाच्यत्वादिकं वारयितुं त्रियुगायेत्युक्तं सुखेनापि नरत्वं श्रुतवाणीयवर्णायस्येतव वाराहरूपत्वे षिचदो

भा०पं०ना०

७१ ५५

7)

३५

७२

भूति२ धि७

एवंकालितासंख्यायपात त्वन्नावच्छेदयपाता त्विकवुद्ध्याऽनंतत्वेभवत्त्वयाप्यात्मबुद्ध्याऽपनीपतेऽपनुद्यते ऽसंख्यात्तविभूतित्वात्तस्मै सांख्यनिदर्शनाय संख्या बुद्धिर्यया व्यवसायात्मिका प्रकृतिपुरुषस्वरूपाप्तमाविषयाये यसांख्यं नितरां दृश्यतेऽनेनेति निदर्शनं यस्य सांख्यज्ञानगम्याय तस्मै॥ ननु भगवद्विभूतस्य जगत आनंत्ये कथं भगवत्स्वरूपस्यानंत्यं प्रकृतिपुरुषादिनिरूपणादितस्यानंत्यं प्रकृतिपुरुषपरतत्वत्वेऽपि [illegible] घटते नान्यथा अत्रोच्यते देशकालवस्तुपरिच्छेदयाहित्यरूपं हि तावदानंत्यं तदेव त्रिविधमानंत्यं परमात्मनि सुस्थं इदमत्रास्त्यत्र नास्ति इमिदानीमस्ति कल्यांतरे नास्तीति देशकालपरिच्छेदयोरभावादिदमि[illegible]नभवतीति वस्तुपरिच्छेदस्यापि सर्वसर्ववस्तुसीमानाधिकरण्याभावरूपस्याभावाल्लक्षणः सर्वात्मकत्वेन सर्ववस्तुसमानाधिकृतत्वव्यपदेशाविषयत्वात् जीवानां त्वणुपरिमाणविषयत्वेऽपि तेषामानंत्याक्रमिभूतज्ञानस्य संसारदशायां कर्मसंकुचितत्वेऽपि वस्तु

संख्यापपातत्वत्वाऽपनीयते तस्मै नमः सांख्यनिदर्शनाय ते २८

तत्सत्प्रभावान्मुक्तिदशायां स्वानंत्यायकल्पत इत्यानंत्यं श्रवणाद्युक्तगौ चेतनानां हत्त्वं जीवद्वारकत्वपाऽनेनजीवेनात्मनानुप्रविश्यति श्रवणाज्जीवस्वरूपस्यानंत्यत्वाच्च तेषामप्यानंत्यं देशकालतश्चास्त्येव अचेतनस्याधिकरणावस्थायां नियतिरूपः सूक्ष्मदशापन्नत्वेऽपि कार्यावस्थायामानंत्यमस्त्येव तदिदं प्रकृतिपुरुषापेक्षया परमात्मन आनंत्ये को विशेष इति चेदियांस्तु विशेषः यत्कार्यावस्थायां कारणावस्थायां च स्वरूपगुणाभ्यामानंत्यं ईश्वरे वस्तुदेशतश्च धर्मकृतं कर्मलक्षणमुक्तावस्थाकार्यावस्थयोरिति ननु वृक्षणः स्वरूपस्य सर्वात्मकत्वेन सर्ववस्तुसमानाधिकरणापि [illegible]च वस्तुपरिच्छेदसत्त्वेऽपि कथं तद्गुणानां वस्तुपरिच्छेद इति चेत् [illegible] तर्हि वस्तुपरिच्छेदः यद्गुणेभिस्तेनसौचेगुणोभिकर्षभावो कथं तस्य पादनावर्णास्तु [illegible]पेक्षयानवत[illegible] पवित्रत्वोज्ज्वलत्वगुरुत्वादिभिर्गुणैः।

सम्भवेन२

भाव

५१ शरीरं हि कथं

भा० पं० १२१०

वो भगवान् अत्र प्रधानस्य गुणैः सत्त्वादिभिः प्रधानापि प्रापणत्वस्येति नपुंसकनिर्देशः विश्वस्य स्थितिसंयमोदये स्थिति
लयः सर्गं करोति कथंभूतमीप्सितं धर्मार्थकामामोक्षार्थं चतुर्विधं यस्य साधनाप्रयुक्तकरणबलेवरादिप्रदानेन जी
वानुग्रहार्थं स्वाज्ञया सृष्ट्या रक्षस्य ईप्सितत्वं जीवार्थत्वेने प्सितमिति यावत् स्वार्थत्वेनानीप्सितमित्यर्थः तस्मादी
प्सितुः संकल्परूपज्ञानवतस्तस्य ते मायासत्त्वादिगुणात्मिका तत्त्व शरीरभूता माया यथा गुणैः पस्कांतानदस्त्र
पं तदात्मसुखं स्वदेहोत्लोहश्रमति तस्मात् तत्संकल्पानुगुणकारिणी भ्रमती तिभावः यद्वा ईप्सितुः तद्देहत्वं जस्य प्रजा
वयत्प्रयुक्तावेधहणवतः तस्य तव माया तस्येतिषष्ठी शरीरभावसंबंधे तच्छरीरभूता माया यत्र तादर्थ्ये षष्ठी ईप्सि
तस्य सामर्थ्यात् तदर्थीना माया तद्दाहित्वं तत्र जातिर्विश्वस्य सर्गादिकरोति इत्यर्थः स्वतोऽनाकाः कथमद्वसुप्रवेनाम
ऐश्वर्यात्मकिमती स्यात् तत्राह यथा यो भ्रमते तदा भ्रपेश्वर्याच्छति विश्वसर्गादि कर्तृत्वस्य परमात्मधर्मत्वेन माया करोतीत्यु
क्तमिति चेदुच्यते भगवदवतारस्य रामकृष्णादीनां सर्गादि कर्तृत्वस्य रजःप्रदिमाया गुणप्रायुर्यप्रयुक्तत्वान्मायाविश्व
सर्गादिकं करोति इत्युक्तमिति नेप्सितमित्यनेन विश्वस्थित्यादिकं न भगवतो भोगार्थमित्युक्तं ईप्सितमित्यनेन जीवा
करोति विश्वस्थितिसंयमोदयं पस्येप्सितं नेप्सितमीप्सितुर्गुणैः मायायथा यो भ्रमते तदाश्रयं ग्रावाणं नमस्ते गुणकर्मलीलाय ३६
नुग्रहार्थं लीलार्थं चेति सूचितं ननु विश्वस्थित्यादिकं न जीवानुग्रहार्थं किं तु गर्भजन्मजरामरणादिदुःखहेतुत्वेन
जीवनिग्रहार्थमेव स्यात् किं चादितकरणकलेवरादिप्रयुक्तवैषम्यनैर्घृण्ये च भगवतः प्रसक्ते इत्यत्राह नमस्ते गु
णकर्मसाक्षिणे गुणानां मायागुणानां सत्त्वादीनां कर्मणां पुण्यपापरूपाणां चानादीनां साक्षिणे साक्षाद्द्रष्ट्रे तेन मः
जीवगुणकर्मानुसारित्वात् करणकलेवरादेर्न वैषम्यनैर्घृण्ये भगवतः प्रसक्तिरितिभावः तथा च सूत्रं वैषम्यनैर्घृण्ये न सापे
क्षत्वात् न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति सूत्रभावः भगवान्जगद्धेतुः स्वस्मिन्प्रलयं
तु तचिदचित्तत्त्वः सर्वसः सर्वशक्तिः परमकारुणिकोऽवाप्तसमस्तकामः स्वस्मिन्प्रलीनमसत्कल्पं चेतनवर्गमालो
क्य सर्वेषां समानेन धर्मादि पुरुषार्थसाधनं तदाराधनापयुक्तकरणकलेवरादि परिग्रहार्थी तत्कर्मवासनानुसा
रेणदापाराधनप्रकारावबोधि वेदार्थं शास्त्रं च प्रदर्श्य ... ते जीवाः करणकलेवरा

७२

72

३६

७३

८१ ७२ ते२

सर्वान्तरात्मत्वमुमुक्षूपास्यत्वादिकमनुसंधानो नमस्करोति यस्येति कवयः प्रकृतिपुरुषेश्वरयाथात्म्यविदः पश्यन्ति विप
श्चितः सर्वज्ञाः स्वतत्त्वविविधं पररूपं चिद्धि विपश्चितः परमोदारादिरूपोऽयमस्य स्थाने चकारादेशः सोऽयं संसर्गजा मानस
ह्रस्वत्वाद्विपश्चितो विविधविपश्चिद्भिर्धीवृत्तिरिति प्रयुक्तः स्वरूपं सत्यज्ञानमनन्तं ब्रह्मेति लक्षणलक्षितं गुणान्
परिणामरूपेषु देवादिशरीरेन्द्रियमनस्सु भूतेषु गूढं क्रियापार्थैर्गूढं क्रियापार्थैः कर्मफलैर्गूढं तत्तिरोहितं जीवसंवृतं क्रिया
फलैस्तैर्गूढं तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणमिति जीवानां कर्मभिः परमात्मस्वरूपस्य तिरोहितत्व

२५

श्रवणादिदर्शनं दृष्टुं साक्षात्कर्तुं मिथुनः दारुषु जातवेदसमिव मथ्या विवेकवानैर्धैर्यमनसा मथ्यन्ति विवेचयन्ति
यविंशतितत्त्वमयः पञ्चकृत्यपररूपतीत्यर्थः दारुष्विव जातवेदसमित्यनेन सर्वान्तरात्मत्वमुक्तं दिदृक्षवः कवयः इत्य
चविंशतितत्त्वमयः पञ्चकृत्यपररूपतीत्यर्थः इत्यनेन नमः ईरितात्मनुक्तिपाठे इरिताः प्रेरिताः नियमिताः आत्म
नेनतत्त्वमुक्तं तस्मै ईशितात्मने कर्तरि ... ईश्वराय परमात्मने केवलाय एवमुक्तं
नो जीवाय तस्मै ईशित्रे ३२ [illegible]

ते२ ते१

यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसं मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरिता
त्मने ३२ द्रव्यक्रियाहेतुयने शक्तिभिर्मायया गुणैर्वस्तु निरीक्षितात्मने अन्वीक्ष्याङ्गातिशयात्मबुद्धिभिर्निरस्तमा

दवि१

याकृतये नमो नमः ३३ इदं विज्ञापयन्नमस्करोति द्रव्येति अङ्गेत्यभिमुखीकरणे हे भगवन्नत्यतिशयात्मबुद्धिभिर
तिशयितात्मपरमात्मविषयबुद्धिमद्भिः पुरुषैरन्वीक्ष्य निपुणं निरूप्यान्तर्वस्तुतः परमार्थतः प्रकृतिपुरुषविलक्ष
णत्वेनेति यावत् निरीक्षितः आत्मस्वरूपं यस्य निरस्तमायाकृतये निरस्ता माया कृतिः प्रकृतिर्यस्मात् तस्मै तेन नमो नमः
ति केः सकुत्रनिरीक्षितं तत्त्वतः द्रव्यभूतपञ्चकं [illegible] क्रियाहेतु यागादिकर्मैर्द्विपं अपनेतानेद्विपं ईशते ऽनेनेति ज्ञान
धीः सा नत्वा बुद्ध्या देहेन्द्रियं अयनं गुणाः ... समाहारद्वन्द्वः एतत्सर्वात्मरूपम् ... शरीरं तत्कर्तृभिः सम्पत्ति ... मायागु
णैः सहनिरीक्षितात्मने नमः देहेन्द्रियगुणाख्यजीवात्मभिः सह निरीक्षितात्मेत्यर्थः अनेन एवंभूतोऽस्मि

मा०पं०ना०

प्रकृतिपुरुषविलक्षणं परमात्मस्वरूपं विशेष्यत्वेनावस्थितं नमस्करोति पादेति विशुद्धं रागाद्यकलुषितं
तदनुभवैकमात्रेण ज्ञानैकस्वरूपमात्रं कृत्स्नमिदं यज्जगत् स्वरूपत्वे विवक्षितं तेविशुद्धानुभवैकमेव विशुद्धानुभवैकमात्रम
नेन स्वरूपं निर्दिश्यते स्वतेजसा स्वप्रकाशेनात्मनित्यात्मकुक्षिस्थितानेनस्वरूपविशेषकधर्मभूतज्ञानेन ध्वस्ताः नित्यं निरस्ता
गुणा रजआदयः तत्कृताः तत्त्वस्य उत्पत्तिस्थितिमरणरूपाश्च अवस्थाः यस्य स्वतेजसा ध्वस्तगुणावस्थमित्यनेनप्रकृ
तिसंसृष्टचेतनव्यावृत्तिः सद्यध्वस्तगुणावस्थः प्रत्यक्षानमज्ञानापि यस्मात्कोकमोहनरामस्तुरूपोर्मिषड्करहिता
नंदस्वरूपं यद्वा विशुद्धत्वात् नैर्मल्ये कानुभवव्यावृत्तिः प्रत्यक्षा तत्त्वात् नानित्यरागाद्यकलुषितत्वमुच्यते ऽनेनमुक्तचे
तनव्यावृत्तिः सदि वद्धावस्थायां रागादिभिः कलुषितः प्रत्यक्त्वस्ते मा सामानमनेनपराञ्चोऽचेतनस्य व्यावृत्तिः नह्य
चेतनं स्वस्मै स्वयमवभासते किंतु परस्मै एव सुषुप्तिपासम्यग्ज्ञानेनोपलक्षनेऽपलभ्यते ऽस्तु पलभनेन्नूपलेख्यस्यपावुद्धो
सूत्रमयासत्त्वमद इति भिः प्रद स्मनीषामनसाभिक्लृप्त इति श्रुत्युक्तयोगपरिशुद्धबुद्ध्योपलभ्यमानमित्यर्थः अनेनैव तत्का
रणत्वमुपलक्षितं तत्काश्रयः कारणं तु ध्येय इति ध्येयत्वकारणत्वयोरेकनिष्ठत्वश्रवणात् यदि कारणं तर्हि कार
73
तन्मूमानु० यत्तद्विशुद्धानुभवैकमात्रं स्वतेजसा ध्वस्तगुणावस्थं प्रत्यक्प्रशान्तं सुषुप्त्युपलंभनं ध्वनामरूपं निरहंप्रपद्ये
त्वस्य मायावस्थाविशेषैतः प्राग्वस्थायोगित्वरूपत्वात् देवादिनामरूपयुक्तत्वस्यात्तस्य सत्पंत्तानमनंतानि किंपुनिष्कलं
इत्यादि निर्विकारत्वश्रवणविरोध इत्यत आह अनामरूपमिति नविधे स्वमात्रनिषेदेवादिनामरूपप्रकृतिपुरुषवि
शिष्टस्यैवकारणत्वाद्देवादिनामरूपयोः स्वविशेषणीभूतप्रकृतिपुरुषगतत्वात् तद्द्वारा मननामरूपत्वेपि साक्षाद्देनामरू
मित्यर्थः एवंभूतयद्विशद्वतमुप्रसिद्धं तत्परब्रह्मस्वरूपं हरिं पुरुषं केनैव पुरुषान्तं मतियावित् एवचावियोपुरुषोत्तम
इत्यारभ्य अहम् पुरुषस्त्वेन्यपरमात्मेत्युदाहृत इति भगवद्गीतोक्तनित्यमुक्तबद्धविविधचेतनव्यावृत्तस्वरूपविवक्षितं
तन्निर्दिष्टस्यपर्वाद्धेन मुक्तव्यावृत्ति लक्षणादिनित्यसिद्धव्यावृत्तनेनुहरिमित्युक्तं निरहमिति पाठे त्वनामरूपत्वेन
तद्विषस्यन्यवृत्तेः मत्वोरहितेनाहं नाहंकारः प्रकृतिपरिणामरूपबद्धोजीवश्चात्पत्ते आत्मनामपहतमरीषहता
रहंत्वहेतुः प्रत्यक्मयोऽदितेनाहं नाहंकारः प्रकृतिपरिणामरूपमिति पञ्जनवाच्यः एवंभूतप्रपद्येऽपायोपायभाव
तत्तः स्मानिरहंप्रकृतिपुरुष

क्रि ४२

योजगतामादिः कारणभूतः सूकरः प्रांप्रत्वी दंष्ट्रे कृत्वा निधापरसातलात्प्रस्थउद्दन्वतः प्रलयाब्धिवादिभोगजठ
वनिरगात्तत्र आपुत्रिवाराणां प्रतिजगतुल्यदैत्यं हिरण्याक्षं प्रमथ्य हत्वा क्रीडद्भिर्ययुः तस्मै विभवे प्रणतोस्मि ३५ इति पंच
मेऽध्यायः॥ तत्र मिलावृतादिषु सर्वेषु पास्यादिकमुक्तं अथ शनी किंपुरुषे भारते च वर्षे तद्दन्वे यामध्य भारतवर्ष
मे४ श्रेष्ठं चोक्तं कानविनोन तत्रादौ किंपुरुषे उपास्यं भगवंतं तदुपासकं जप्यमंत्रं स्तोत्रं चाह किंपुरुषमिति आदि
पुरुषं जगत्कारणभूतं परमपुरुषं लक्ष्मणस्य सौमित्रेरग्रजं सीताया मैथिल्या अभिरामं मनुरूपं रामं दाशरथिं रामं
वाभिनो नते नित्यानंदविग्रहात्मनि इति रामपदेनासौ परब्रह्माभिधीयते इति निरुक्त रामं तत्त्व पुष्कलप्रवृत्तिनिमि
त्तांतराभावात् तस्य श्रीरामस्य चरणयोः सन्निकर्षः सान्निध्यं भजनमिति यावत् तस्मिन्नभिरतः आसक्तः परमभागवतो
नाम्ना तस्य श्रीरामस्य चरणयोः सन्निकर्षः सान्निध्यं भजनमिति यावत्तस्मिन्नभिरतः अविरतभक्तिर्यस्य तादृशः उपास्ते १ भगवतो भर्तुः श्रीरामस्य कथां गंध
हनुमानर्जनेन पः किंपुरुष वर्षस्थैः सह अविरतमविच्छिन्नाभक्तिर्यस्य तादृशः उपास्ते

प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं
विभुं ३५ इति श्रीमद्भा० पंचम० १८ ८ द्वो ध्याय किंपुरुषे वर्षे भगवंतमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसं
न्निकर्षाभिरतः परमभागवतो हनूमान् सह किंपुरुषैरविरतभक्तिरुपास्ते १ आर्ष्टिषेणेन सह गंधर्वैरनुगीयमानां परम
कल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदमुपगायति २ ओं नमो भगवते उत्तमश्लोकाय नमः आर्यलक्षण
शीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ३

वैरूपसमीपेगीयमानां मार्ष्टिषेणे नार्किंपुरुषवर्षस्य पुरुषश्रेष्ठेन सह स्वस्य गुणमुत्तमेति स्वयमिदं वक्ष्यमाणमुपगायति
गायति जपति २ उत्तमश्लोकादिभिः श्लोक्यते स्तूयते उत्तमैर्निरस्तं अपश्लोको पनायस्पृति वा तस्मै आर्यलक्षणा
निशीलानिचरित्राणि परस्मिन् उपशिक्षितः संपन्न आत्मा चित्तं येन उपासितउपस्थितः लोकोयेन साधुवादः साधुत्व
निकषः तस्य निकषणायपरिक्षकाय ... रणस्थानपत्वात्पन्नितत्साधुः ब्रह्मण्यः तत्रलोधुरित्तियस्य तस्मै पेचाभाव
कर्मणोरितिप्रकृतिभावाद्विलोपः अथवा जीवितेनयथालोकासीत्तेसललक्ष्मणोनलब्धाति ... समुलक्षणं लक्षणं येनविवे
... सच्चारोहतः स्वतेजसा

भा०पं०ना०

७४

नेति सश्रीरामरूपेणावस्थितः परमात्मा आत्मवतां प्रशस्तमनसां निर्धूतनिखिलसांसारिकधर्माणां सनकादीनां
मात्मा सुहृत्तमः स्यात् किं तेषु रतिं न्यायसौहार्दिनिषु आश्रितानां निरतिशयप्रीतिविषयश्च भगवान् ज्ञानघनः केवले।
स्वार्थी दिव्याङ्गरूपभृत् वासुदेवः सर्वत्रासौ समस्तं च वसत्यत्रेति वै पतः ततः स वासुदेवेति विद्वद्भिः परिकीर्तित इत्युक्तरी
त्या सर्वत्रावस्थितोपि तत्कृतदोषैरसंस्पृष्टः सर्वस्य धातृत्वेन च परिगृहीतं त्रैलोक्याख्यं जगदन्तर्भूते कस्मिं
श्चिदपि राज्यादिविषयभूते वस्तुनि न सक्तः ये चादौ धारणेन सक्त एवेत्यर्थः यतो न सक्तः अत एव स्त्रीकृतं स्त्रीविश्ले
षादिकृतं कश्मलं दुःखं नाश्नुवीत अश्नुवतां तस्य मत्तोऽतिशिह्वलता यत्र भावः स्त्रीकृतं कश्मलं एवंभूतान प्राप्नुयादेवान्यथे
त्यस्य सर्वत्रानुषङ्गः तथा लक्ष्मणं च अद्यान्सीतां च विहाय तु त्वं कुत्र गच्छसि निवासशय्यासनपादुकां भुक्त्वा पथा न वर्त
ते एवं वारणात्युपयुक्ताभिरीश्वरे शेषत्वं गतो भगवतो नित्यानपायिनी तस्या बलात् रूपं भवतस्तु स्नेहाद्वैदेह्या गिरिसानुषु रं
स्यते अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते कृतार्थोऽहं भविष्यामि न च चार्थः प्रक

नैवं स आत्मा आत्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातु

मिच्छति ॥ १५ ॥ त्वं नादि इति सर्वावस्थोचितानशेषांश्चैव करतिः कृतानित्या किं करप्रार्थ्यमाने लक्ष्मणे निश्चैवाहो जगन्माता
लक्ष्मीर्नित्यानपायिनी राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनि अन्येषु चावतारेषु विष्णोरेषानपायिनी इत्युक्ते
र्नित्यानपायिनी लक्ष्म्यवताररूपा भगवती सीतां च मम स्त्रीत्वादिना मरणे प्रियादिज्ञाननोत्पत्ते मर्द सच मम प्रियः मि
त्रभावेन संप्राप्तं न त्यजेयं कथंचन अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम इति वदन् कथं त्यजेदिति अतः केवलं मत्परि
हासार्थं सांसारिकपुरुषचेष्टामनुसृतवानित्यर्थः सीतालक्ष्मणत्यागस्तु श्रीरामायणे उत्तरकाण्डे प्रसिद्धः अत्राप्येव
तामाह त्यनेनाप तत्तत्तु नास्तिवितेना भावात् १५४ आत्मारामं तमानन्दमसितमव्ययं विहितं रागोपासन
प्रतिपादकमनुलब्धपूर्णत्वाभिज्ञानात् तस्य रागादिभिः कालुष्यं सूचितं अतएव स्त्रीसंयोगवियोगकृतसुखदुःखाद्यभाव
अवेदितव्यः भगवानित्यनेन षाड्गुण्यपूर्णत्वं उक्तं आत्मारामत्वेन स्त्रीसंगादिनिमित्तसुखानादरश्चोक्तः

७४

मस्तु परः स्य ब्रह्मणोऽन्याकृत्पत्वं श्रीरामस्य तन्नामस्तु एतत् भिन्नं किं तस्य मनुष्यत्वं नामरूपं ... वा तस्मात् मर्त्यस्येति विभोः पर
स्यैव ब्रह्मणः इह लोके श्रीरामस्वरूपेण मर्त्यावतारः मनुष्यावतारः अहीं वेरो नाम ... अहं स्वभावस्यैव स्वरूपानुग्रहः
स्वयं च परब्रह्मैतज्जः स्वभावमनुष्यसजातीयरूपपरिग्रहो नवदितिभावः किमवतारप्रयोजनं तत्राह मर्त्य शिक्षणमस्तोन
संसारदोषज्ञापनेन धर्मसंस्थापनं साधुपरित्राणं प्रयोजनमिति भावः तत्र मर्त्यशिक्षणमेव तस्य प्रधानप्रयोजनमित्यर्थः तथा
चोक्तं भगवता परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे इति विनाशाय चेत्यत्र च शब्दे
२६ नावपरः भिक्षामार्गमानयति वत् दुष्कृतविनाशनमानुषङ्गिकं प्रयोजनमित्यर्थः धर्मो नाम चातुर्वर्ण्यचातुराश्रम्य
वस्य पारमार्थिकवर्णाश्रमसाधनरूपः पंचमहायज्ञादिः तस्य संस्थापनं संसारदोषज्ञापनेन निवृत्तिदुःखकृतावि...
कल्पमात्रेणाप्युपपद्यते साधूनां त्याग्यासनात्र भोजनादिषु भगवता सत्त्वे ते मानानां तद्विनाशनमात्रमपि कल्पसह
मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानी
श्वरस्य ज्ञानानन्दघनस्य ... संभाषणादिभिः परित्राणं सुखीकरणं धर्मसंस्थापनं च संकल्पमात्रेणोपपद्यत इति भावः यद्
कं मर्त्यशिक्षणं तदाह ... इति तदस्मिन्नवतारे निदर्शयति ... अन्यथा ऽवतारस्य मर्त्यशिक्षणा
स्याभावे ईश्वरस्य ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ... सर्वे निपतुः रसापहे
तो रावणो ... किंकार ... स्वस्य स्मि त्रि रत्ति ज्ञाप्य परिच्छिन्नानन्दस्वरूपे आत्मनि रमतः उक्तवि
ध स्वस्वरूपानुभवेन नित्यसंतुष्टस्य विषयासक्तिरहितस्य सीताकृतानि सीताविश्लेषादिभिः कृतानि व्यसनानि दुः
खानि कुतः कस्माद्धेतोः स्यात् ... एकवचनं कुतोऽन्यथा स्यादमत इति पाठे तत्तु सुगमं सर्वनियं
तुः सर्वान्तरात्मनः स्वानुभवे संतुष्टस्य श्रीरामरूपस्य नास्ति तस्य परब्रह्मणः सीताविश्लेषादिकृतव्यसनानुकरणं
निरतिशयदुःखावहः संसार इति लोकस्य प्रदर्शयितुमेवान्यथा ... तस्य सीताकृतव्यसनानि न घटन्ते

भा०पं०ना० एवं भारते वर्षे उपास्यं भगवद्रूपं उपासकं जप्यमानं मंत्रं स्तोत्रं चाह भारतेपीति भारतेपि वर्षे भगवान्नारायणाख्यो बद
रिकाश्रमे आकल्पांतं कल्पपर्यंतमव्यक्तगतिरलक्ष्यमेवं करोतीति तत्रेद्विज्ञातचेष्टः तपश्चरति कथंभूतं उपचिताः प्र
१५ वृद्धा धर्मादयो येन तदुपचितधर्मज्ञानवैराग्यैश्वर्ययोगोपरमं आत्मोपलंभनमात्मा उपलभ्यते साक्षात्क्रियते येन तदात्मो
पलंभनं तत्र कर्मधारयः तत्र धर्मः कर्मयोगः ज्ञानमात्मपरमात्मज्ञानयोगः वैराग्यं मनोनिग्रहः ऐश्वर्यमणिमादि
नियोगः प्राणजय उपरमो बाह्येंद्रियजयः किमर्थमेवमनीश्वरवत्तपश्चरतीत्यत्राह आत्मवतामनुग्रहाय आत्मवतो नु
गृहीतुं मुमुक्षवः एवंविधं तपः कुर्युरित्येवं शिक्षयाज्ञाननुग्रहीतुमिति यावत् आत्मवत्स्वनुग्रहे तस्य कृपैव कारण
मित्याशयेनाह अनुकंपयेति तं श्रीमन्नारायणं भगवान् षाड्गुण्यपूर्णः नारदः वर्णाश्रमवतीभिर्वर्णाश्रमधर्मानु

श्रीशुक उवाच भारतेऽपि वर्षे भगवान्नारायणाख्यः आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्ययोगोपरमात्मोपलंभ
नमनुग्रहायात्मवतामनुकंपया तपो व्यक्तगतिश्चरति १ तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभि[illegible] प्रजाभिर्भ
गवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरतीदं चाभिगृ
णाति २

वर्तिनीभिः भारतीभिर्भारतवर्षवासिनीभिः प्रजाभिः सह सांख्यमात्मपरमात्मज्ञानयोगः योगोऽष्टांगवर्णा
श्रमोचितपंचमहायज्ञादिरूपः कर्मयोगो वा आभ्यां भगवत्प्रोक्ताभ्यां भगवद्गीतायां चाधिकेन प्रोक्ताभ्यां अन्योन्यानवगीत
त्वमित्यारभ्य एवाहे अभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु इत्यारभ्य चोक्ताभ्यां गीतायां वेदवचनत्वात् ब्रह्मणोक्तं परमभ
क्तिभावेन परमभक्तिरूपेण भावेनाभिप्रायेण उपसरति अनुवर्तते कर्मयोगज्ञानयोगानुगृहीतनिरतिशयभक्ति
योगेनानुवर्तते इत्यर्थः कथंभूतः भगवतोऽनुभावः उपवर्ण्यते येन पंचरात्रेण तद्भगवदनुभावोपवर्णनं तत्पंचरात्रं सा
१५

लुब्धतीस्मुक्तरीत्या देवानानवेद्य तारं तस्य मनालोच्य उपकार भासमवले ख्यातिर्यंक्रि रुत्वमात्रेणापरित्यजतोनिवसिरा यसुहृत्वमस्यमत्वे [illegible] शिखुलमेतरेणानित्यानया यिनोः सीतालक्ष्मणयोस्त्यागेनधृष्टलं इत्युक्तं भवति ६ तारत [illegible] स्यमना दृत्वा स्त्वा क्रिवलस्यमात्रेणानिरर्तिन्त्रायथ्रीत्रिविक्रिपत्वरूपे तदस्मिन्त्रलावनारे रुद्रीपतिनेति महतः न्नरण्णगेन्द्र उभाज्जनेनि नजन्मादिविशिष्टं पापीपासमर्पिरहत्नुः त्रि क्षीरित्रस्य श्री रामरूपेणावस्थितस्य वृत्त्रणः जन्मविप्रादिजन्मनतोवहेतुः तथा सोदयो थ्यय न सुकुर्द्धिन्त्रातयोनतो षहेतवः नैपिद्यापि तस्यानुग्रहदर्शनादितिभावः तथाहि तिर्यंचोभावः तैर्यंत्र [illegible] तिर्यक्त्वं तेन सखान्वनौकसः वनस्थानलान्कपीन्श्रुतिलक्ष्मणाग्रजः पूर्वोक्त विधानं तावतार रूपलक्ष्मणाग्रजः। नित्यं तसहस्रेचैः श्रीरामः सरव्यं चकार वृत्तत्याक्षर्पि सख्यमिति पाठ सरव्यविषयेनञ्चकारत्यर्थः तैर्यग्विसख्यमितिपाठे। पत् यस्मात्तेज्ञैनसो भगादिभिः विसख्यान्परित्य [illegible] कानणिनोस्मान्सरव्यं चकारजन्मादिकं तारतम्यमनवेद्यसंश्रयमात्र एणस्माभिर्हीनैः स(सरव्यं कृतवान् वतान्ते स्यसुहृत्त्वमत्वमेवविधमिति लिनिवेत् मनावथमित्यर्थः ७ यत एवापनिरीतत्र

तज्जन्मनूनं महतोनसौभगं नवाक्सबुद्धिर्नाकृतिस्तोषहेतुः तैर्यद्विसखानपिनो वनौकसःसक्रचकारसख्येवत लक्ष्मणाग्र जः ७ सुरोऽसुरोवाप्यथवानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमं भजेत रामं मनुजाकृतिंहरिं य उत्तरानमनयत्कोशलान् दिवमिति ८ यस्तेऽस्मत्तस्य मनुजाकृतिमनुष्याकारं श्रीहरिसुकृतज्ञं उपकाराभिज्ञं मध्ये व्रजीणि तां यातु पत्तयाः किं तेनकपे नरः प्रत्युपकारार्थी विपत्तिम्रमभिकाड्क्षत इत्युक्तविधेपकाराभिज्ञपुरुषोत्तमं श्रीरामं [illegible] सुरासुरनराणां मध्येयः कश्चित्सर्वात्मना सर्वप्रकारेणकेनापि तदीयतासंपादनप्रकारेण भिपावत् भजेत्तमेवत्त कथं तन्मात्रेणैव तमनुगृह्ण ति तत्राह [illegible] यः श्रीरामः उत्तरकोशलानुत्तरकोशलस्थान् लोकान्तरगुल्मलतादीन्त्रस्वदेशवासित्वमात्रमवलम्ब्य दिव स्वकीयमत्पदंप्रापितवान् न केवलं ज्ञानक्रियाभक्तियोगानेवापेक्ष्यानुगृह्णाति स्वयं श्रीरामइतिभावः तथाचोक्तं श्रीवत्स कमिश्रैः त्वामा [illegible] मनेतिकवयः करुर्णमनाद्ये ज्ञानक्रियाभजनलभ्यमलभ्यमन्ये: एतेषु केनवरदोत्तरकोशलस्थापूर्व

भा.पं.टी.

७६

त्रिगुणात्मकशरीरकर्तृत्वेऽपि गुणकर्तृत्वाज्ञानसंकोचाभावान्न च जीवादिवल्लक्षणकर्तृत्वं द्रष्टृजीवस्य गुणैः संसारित्वादि
मिति शिष्यस्य प्रधानस्य गुणैर्जीवात्मा हि लिप्यतेऽतो न दृष्यत इति वा यो जया एवं विद्विद्वेऽलक्षणत्वे अत एवासङ्गोऽयमा
त्मा हितो विविक्तोऽसङ्गः स्वतुल्याधिकहितो यत्रवस्तु [illegible] रहितः साक्षी सर्वस्य चेतना चेतनात्मकस्य तेन तु
तथा इच्छावेत्य सर्वविद्वत्साक्षी न लिप्यते न मः कर्तास्य सर्वा हितो न बध्यते इत्यपि पाठः तत्रास्य जगतः सर्गादौ सिसृक्षि
तिः स एव कर्तापि न बध्यते अस्मकृत्वा जीवस्तु त्वगुणान्तु गृह्य परमात्मा पतक कर्तास्वकर्मभिर्मनभोग रूपं तेन
सा कर्ता हि सोऽभिमानेन बध्यते संसारी भवति परमात्मा [illegible] जगत्सर्गादौ निर
पेक्षः कर्तापि न बध्यते जगद्व्यापारस्य लीलामात्रत्वेन सुखदुःखादिफलभोक्तृत्वाभावात्तत्रासक्त्यभावादिति भावः
तथा देहगतोऽपि देहेऽहं देहसंबन्धमुक्तेः सुखदुःखादिभिर्नहन्यते नाभिहतो भवति कुतः निर्विकत्वान्निरस्तनि
खिलदोषतया समस्तकल्याणगुणाकरतया च जीवविपर्ययेण लोऽदेहेंद्रियादिमोक्षितत्वात्त्वादि हिलक्षणस्वरूप
कलीकृतशील त्वादिति भावः तथा चायोगरस्तस्य ततोऽपि परश्रेयस्यलिंगं सर्वत्रहीति सर्वत्रावस्थानतोऽपि परस्य
त लोऽभ्रवर्णार्थगंधः संभवति कुतः सर्वत्र अनुतिष्ठति गुणत्रयसा भयलिंगं अचल तत्त्वं निरस्तसिद्धिवल दोषमनंत कल्या
णगुणाकरमभिधीयत इति तदर्थः अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः
इत्यादयः श्रुतयः समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोद्धृतभूतसर्गः परः परस्य सकलात्मप्रवेलेशमात्रद्यः
संनिधयरे शक्त्यादयः स्म तथः अयं भावः जीवस्य कर्मविपाकत्वात्तत्कर्मानुगुणत्वेन तत्तेन हस्तु संबन्धो प्रवृत्ताः
वस्था तस्य तु प्रलयः स्वाधीनः स एव संबन्धस्तु हि चित्र नियमनरूपलीलारसापेक्षया हि तिष्ठति तथा च श्रुतिः
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति तथा हृषु स्वस्वकर्मानुगुणज्ञानाभ्रमस्य भिन्न तेन हि प्रस
दात्मस्वरूपात्मा स नाम नु न मपि पाव मिति गुणकीर्त्यां कर्मणा तेरेहितस्यानस्य जीवस्य परस्परं कर्मतदेशोऽप्य
नादितः साक्षिरूपो वसनवदनात्समुदायरूपं तत्र भगवतस्तेव परमस्य वततः अन्नमयः पुरुषः साक्षी तिमयल्लाम सहस्वेपा
तु अनन्तः संज्ञायामिलयस्य न विरोधः द्वा इति द्रष्टा तत्र पश्यद्वा द्रष्टा गृह्येः द्रष्टृते न स्यादा तौ परमात्मानं दृष्टान्
इति अयं भावः जीवस्य स्वकर्मानुगुणत्वेन दृष्टृदर्शनं नत्वसत्त्वात्मा कल्ये ने निर्गुणोऽपि परमात्मनस्तु निरुपाधिके
नानात्मरूपतयात्मदर्शनमिति [illegible] इति एवं भूतायम

निमित्तद्वयम्।

७६ पाद: गुणकर्मानुपृक्ता [illegible]

मैवमाह ॐ भगवच्छब्दार्थो पूर्ववत् परमं निरतिशयं शीलं स्वभावो यस्य तस्मै सौशील्यविशिष्टायेत्यर्थः महतो
मंदैः सह नीरंध्रेण संश्लेषस्वभावत्वं सौशील्यं अथ माश्रयणे लोकपापादको गुणः इदं वात्सल्य सौलभ्य स्वामित्वानाम
प्याश्रयणे लोकपापादकानामुपलक्षणं उपरतानात्मापानात्मा देहेन्द्रियादिः तस्य भावः श्वासनादिषडूर्मिवर्गः उपर
ते निरस्तमनात्म्यं यस्मात् येन वा तस्मै अकिंचनवित्ताय नास्ति किंचन समर्पणीयं येषां ते अकिंचना निष्कामा मुमुक्षव
स्तेषां वित्ताय निधये रत्नाय परस्मै पेलवतीर्थाय परहंसाय परमात्मके योगिनाम भवति सोऽजीवो यस्मात् एषोदराद्दि
त्वात् माक्षवस्याहत्वः यदहंतिनिरस्यति निखिलान् दोषानिति निरंसः एषोदरादित्वात् साधु भवेद्दुर्गोऽग्न्या इसस्य
नुशासनिकल्याणे परमश्चासौ हंसश्चेति कर्मधारयः परमः निरतिशयकल्याणगुणगणः हंसो निरस्तनिखिलदोषः तस्मै
परमगुरवे निरतिशयापदे शुद्धात्मारामाय नित्यासंकुचिता परिच्छिन्नानंदरूपत्वात् तस्मानुभवपरायाधिपतये सर्वभूतानाम
नारद उवाच ॐ नमो भगवते परमशीलाय अकिंचनवित्ताय निरस्तमायापनरनात्म्याय परमहंसाय परमगुरवे
आत्मारामायाधिपतये नमो नम इति ३ गायति वेदं कर्मस्वसर्गादिषु योऽनवुध्यते न हन्यते देहगतोपि देहिके :

दष्टुर्न दृश्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ४ ॥ ॥ ॥ ॥ श्रीपतये परमात्मने नमः
धिपतये सर्वभूतानामधिपतये अग्रेसराधिपतिरिति श्रवणात् नमस्कारोऽभ्यासो गुणभेदाभिप्रायकः इदं वत्समाप्य
श्लोकचतुष्टयं स्तुतिरूपं गायतिपठतीत्यर्थः यद्वा इदं वक्ष्यमाणं गुणजातं गायति नावक्तृगत्कारं कंचिद् विहितस्तोत्रं
निरस्तनिखिलदोषनिस्समाभ्यधिकं सर्वज्ञं नमस्करोति कर्त्रेति अस्य कल्पस्य चिदचिद्वान्मकस्य जगतः सृष्ट्या
दौ कर्तापि योऽनवुध्यते नाभिमन्यते वा नजर्जापि भगवान् स्वसंकल्पगुणकर्मविभागकः तस्यकर्मेरपि विष्णुकर्तारमन्य
ये इति भगवदुक्तरीत्या कृत्स्नजगत्स्रष्टा परमात्मा न तु लोककर्ता पितृरिवमनुष्यपशुपादपत्वादेन स्वयं कर्तारं न
मन्यते सज्यानां देवादिपदार्थानां देवत्वमनुष्यत्वादि नानाविधसर्गकर्मलिप्तस्य पशाकीनामेव गुणकर्मण्यग्रता
नकारणत्वात्मानं गुणकर्मानु गुणकर्तारं मन्यते न तु साक्षात् किंच प्रनिहितं मन्यत इत्यर्थः तथा देहगतोपि जं
न रात्मतया देवादिदेहस्थोऽपि देहिके देहसंबंधप्रयुक्तैः सुखदुःखादिभिर्योऽन हन्यते नाभिभूयते एवं दृष्टुर्जीवस्य
यद्दृश्यमचेतनं तस्यगुणैः रजआदिभिर्योऽन दूष्यते नसंकुचितज्ञानो भवति कर्मत्वेपि मोहाभावात् देहस्थत्वेपि दुःखाभावात्

वि.पु.टी.

११

भारते पीत्य पिशाचा द्वा द्वीपांतरे प्रवृत्ताः पर्वतानदयश्च संतीति सप्तविंशे सरितः शैलाश्च सरिच्छैलाः बहवः तावच्छैला
नुदिपूलिमलयसह्या दिनाकामगिरिरित्येतेन अन्ये च बहवः संतीत्याह अन्ये च शतशः सहस्रशः शैलाः संतीत्यनु
गः नदीर्वत्समाराणे स्ता सोऽत्यतिस्याने प्रभावं चाह तेषामिति तेषां शैलानां नितंबे प्रस्रुतेभ्यः प्रभवाः संभूताः नदीः
प्रावेतास्वामासिप्रुवाः नद्यो सिप्रवाः प्रुसेव्यानाः संति १० एतासां नदीनां प्रपेजलानि भारत्यः भरतवर्षस्थाः
प्रजाकर्म पूर्वसवलं दीर्घाभावश्चार्षः नामभि रेवपुनंतिनामभिरेव पावित्रयंतिहि गंगागंगेतिपोर्ब्रूयोजनानां पा५

श्रीमुक उवाच भारतेवर्षे सरिच्छैलाः संतिबहवः मलयो मंगलप्रस्थो मैनाकस्त्रिकूटऋष
भः कूटकः कोल्लकः सह्योदेवगिरिर्ह्यृष्यमूकः श्रीशैलोवारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारि
यात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये
शतशः सहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः १० एतासामपो भारत्यः प्रजा
तापं नामभिरेवपुनंतीनात्मना चोपस्पृशंति चंद्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी
वेणी पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा
सुरसा नर्मदा चर्मण्वती सिंधुरंधः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मं
दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधवती सप्तवती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वि
तस्ताऽसिक्नी विश्वेति महानद्यः ॥ नामभिरेवपुनंतीति प्रजास्ता

शतेरपि मुख्यानेसवेपापेभ्यो विमुक्ताः लोकं सगच्छंत्याय मिपुकस्मरणमात्रानुसंधेयं पापं नाम भिरेवपुनंतीति प्रजास्ता
आपः प्रजा आत्मना देहेनापि स्पृशंतीत्यन्वयः नदीरूद्दिशतिचंद्रवसेत्यादिना विश्वेत्यंतेन सिंधुः शोणश्च नदा
वित्याह सिंधुः शोणश्च नदाविति कावेर्याः पयस्विनीत्यादि ... तिनपूतरपरः गोकर्णीवर्द्धन्यापात् गंगानुप्र
वेशप्रपंचितैर्वेत्यत्रानुकेनिवोधं ११ अस्य भारतवर्षस्य प्रासस्त्यप्रतिपादनपरान भिपुक्तैर्गीतान् श्लोका

न् तस्यप्राशस्त्यकारणमाह राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम

एवं जीवपरयोर्हेयास्पदत्वोत्प्रत्यनीकत्वे उक्ते इदानीं जीवस्य देहपतिरसंबोधपो देहाधर्मान्नासक्तापरमात्मनस्तत्वमभक्ति
रेवसैवपुरुषत्वनुरुत्वेनमहत्वमभिहितेत्याह इदं हीति हे योगेश्वर हिरण्यगर्भो योगोपायं पुर्णं कौशलं जगाद ततदिदं मे व
किं तादृगित्यत्राह उज्झितदुः कलेवरः उपेक्षितशरीरः कलेवरशब्दः तत्त्वं धिनामपुपलक्षकः उपेक्षितदेहो नुवं धा
...मवा प्राप्नोति स्वं तत्काले यं तत्कालपर्यंतं भक्त्याध्यानयोगेन त्वयि मनो धारयेत्स्थिरं कुर्यादिति पदं ७ एवं देहाद्युपे
क्षयापरमात्मभक्तिरेव जीवस्यानर्थपरिहारार्थी त्युक्तं इदानीं मुक्तेर्विषयभक्तिरेहि तस्य केवलशास्त्राध्ययनादिरूप
त्वान्निःफलत्वमाह यदेहीति ये हि केचपुष्पानलादि मुक्तिकेवलत्वं कींदिपु कामेषु लंपटः आसक्ताः स्तनादिषु विषयेषु।
वितनपत् तेषामनपापोर्यं चिंतयन्तीत्यर्थः विज्ञानधीलशास्त्रोपि कुत्सितस्य कलेवरस्यात्ययान्मृत्योः शंकेत विभीया

इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् । यदंतकाले त्वयि निर्गुणे मनो भक्त्या दधीतो-
ज्झितदुःकलेवरः ॥ ७ ॥ यदेहिकामुष्मिककामलंपटः स्तनेषु दारेषु धनेषु चिंतयन् । शंकेत विद्वा-
न् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलं ॥ ८ ॥ तन्नः प्रभो त्वं कुकलेवरे र्पितां त्वन्मायया
एवं पातालान्तानधोविवरानुक्त्वाथ पातालतलपर्यन्तभूमण्डलस्याधारं संकर्षणं वर्णयति पंचविंशेन तस्य पातालस्य मू-
ले देशे त्रिंशद्योजनसहस्रान्तरे आस्ते या कला साम्या वा तु तन्नाख्यावाह इति अनन्त इति समाख्याता प्रसिद्धः अनन्तसंज्ञकेत्यर्थः तामसी तामसो-
हंकाराधिष्ठात्री भगवतः कला अंश इत्यर्थः सैव संकर्षण इत्युच्यते तत्राप्यसमाख्याता इति सात्वतीयाः संकर्षणप्रोक्ताः सात्वता व्यपंचरात्रवि-
दः समालार उक्तं भगवत्कलाया व्याख्याविदस्तमनन्तं संकर्षणमिति चक्षते किमिदं संकर्षणं नामाख्यकर्णादिवत्केवलं न हि किं वार्पकजादि
वद्योगरूढमित्यपेक्षायां योगरूढमित्याह द्रष्टृदृश्ययोरिति यत्तोय मनन्तं द्रष्टृदृश्ययोः ... यथोः सन्निकृष्यते विषयी क्रियते तीन्द्रिया
र्थानेनेति संकर्षणः अतीन्द्रियार्थविषयत्वेन साधनं स्वयं व्यातीन्द्रियार्थविषयकज्ञानवानेव मिलरेषामप्यतीन्द्रियार्थविषयकज्ञानप्रदक

५१

श्रीशुक उ० तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्यातानन्त इति सात्वतीया
द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षणमित्याचक्षते १ यस्येदं क्षितिमंडलं भगवतोऽनन्तमूर्तेः सह-
स्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते २ यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिर-
भ्रमद्भ्रुवोरन्तरेण सांकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ३ ॥

३ अर्थः यत एवमनन्तस्ततस्तं सं-
कर्षणमित्याचक्षते संकर्षणत्वमेव स्पष्टयति अहमिति प्रतीयमानो तीन्द्रियो यो जीवस्तद्विषयको भिमानः अहमिति प्रतीतिस्तस्य लक्षणेन
येतीलक्षणं हेतुरिति भावः जीवव्रगाणामिदेवतात्वात्तेषामहमिति छिन्नतिर्हेतुरित्यर्थः १ एवमनन्तशब्दोपि तस्मिन्योगरूढ इत्याह यस्येति य
स्य भगवानां सहस्राणां भगवानमनन्तशब्दस्तेरणान्वयः तस्य भगवतः सहस्रशिरसः अनन्तमूर्तेरेकस्मिन्नेव शीर्षणि ध्रियमाणमिदं कृत्स्नभूमंडलं धातस
र्षप इव लक्ष्यते तो परिच्छिन्नत्वादनन्तस्तस्योच्यत इति भावः २ यदुक्तं तामसीति तामसाहंकाराधिष्ठात्रीत्वं तद्दृढयति यस्येति काले न विपरार्धा
वसाने इदं सर्वं संजिहीर्षितुमिच्छतः यस्य संकर्षणस्य अमर्षेण क्रोधेन विरचिते कुटिलीकृते रुचिरे भ्रमती भ्रुवौ तयोरन्तरेण संकर्षणाख्यः ए-
कादशात्मको रुद्रः ... तिसृषु शिखा यस्य तादृशं शूलमुत्तंभयन्नुदभवत्तामसाहंकाराधिष्ठातृत्वाज्ज

एम १०२

अथ रसातलमनुवर्णयति ततोधस्तादिति ततोधस्ताद्रसातले विवरे दैतेया दानवाः दितेः प्रजाः दनुप्रजाश्च पणयः इति प्रसिद्धास्ते च निवा
तकवचाः कालेयाः हिरण्यपुरवासिन इति त्रिविधाः विबुधानां देवानां प्रत्यनीकाः प्रतिपक्षिणः उत्पत्त्यैव महाबलं प्राप्तिनः महा
तेजसः ते साहसिकाः सहसा दर्पेण चरन्तीति साहसिकाः तथापि तेषां सर्वलोके यदनुभावो यस्य तस्य भगवतो हरेस्तेजसैव सु
दर्शनास्त्रेण प्रतिहताः बलावलेपाः बलमेव वलिनो नगाधियेषां तादृशाः बिलेशया सर्पा इव वसंति २२ तानेव विशिनष्टि ये इति ये वै पणयः
इंद्रदूत्याः सरमया देवशुन्या प्रयुक्ताभिर्मंत्रवर्णाभिर्वाग्भिरिंद्राद्बिभ्यतीति भाषते एवंहि वेदे कथाख्यानं पणिभिरसुरैर्निगूढा गाः
भयथ्य

ततोधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या
महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेः सुदर्शनतेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ये वै सरम
येंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति २३ ततोधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाश
ंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति २४ येषामुह वै पंचसप्त
दशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति
२५ इति श्रीभा० पंचमस्कंधे चतुर्विंशोध्यायः २४ ॥

न्वेहं सरमां देवशुनीमिंद्रेण प्रहितां संधिमिच्छवः पणयः प्राहुः किमिच्छंतीति सरमेत्यादिना
साच संधिमनिच्छंती इंद्रस्तुतिपूर्वकं तान्प्रत्युवाच ता मा दहंतात पणयः पणय इति च सद्वत्वा बिभ्यतीति २२ एवं रसातलमनुवर्ण्य पातालमनुवर्णय
ति ततइति ततोधस्तात् पाताले विवरे नागलोकानां पतयः सर्पाणां जननायकाः यथा वासुकिः प्रमुखः मुख्यो येषां ते ते च ते शंखादयो महा [illegible] महा
भोगिनः ३
फणिनः महाक्रोधाः निवसंति २४ तानेव विशिनष्टि येषामुहेति येषां केषांचित्पंच केषांचित्सप्त केषांचिद्दश केषांचिच्छतं केषांचित्सहस्रं शीर्षाणि तेषां
फणासु विरचिता रचिताः महामणयो रोचिष्णवः प्रकाशनशीलाः ते स्वरोचिषा पातालविवरसंबंधि
तमोजालं विधमंति अपनुदंतीति २५ इति श्रीमद्भागवत भावार्थदीपिकायां पंचमे चतुर्विंशः २४ ॥

श्री।भा। पं।टी। १।२

ध्यानं कथंभूतः सुरादीनां गणैः ध्यायमानः अनवरतं मृदेन स्वात्र भवज्जनितमदेन मुदितः विह्वले विकले प्रवेशे इव स्थिते लोचने यस्य सः सुललित
न सुंदरेण भावेन गर्भेण पितेन मुखरितामृतेन वचनामृतेन स्वपार्षदान् स्वविबुधादीनां यूथपतीन् आप्याययमानः हर्षयन् १ अपरिम्लानः असीणः
रागो रक्तिमा यस्याः नवतुलसिका नवलत्तमं तुलस्याः आमोदः मधुपः आमनवस्वसनयोः समाहारस्तेन माद्यतां मधुकराणां जालास्ते
षां मधुरगीतेन श्रीर्यस्याः तां स्वीयवक्षःस्थले धारयन्तीं वनमालां दध्यादि विशेषः विभ्रतीं यस्य नववान्या नीलवासमीयस्य एकएव
कुंडलं यस्य ह्लसत्क(कु)डि(प्)स्थेहकृताभ्यां स्तुभगः सुकुमारस्य सुंदरो भुजो यस्य एवंभूतो भुवावासेकवणः माहेंद्रः महेंद्रस्य वेयथौ वा
रणेंद्र इव वेरावत इव शुभः उदाराली लाय स्य सः कांचनीः स्वर्णमयी विभ्रतीत्यर्थः ६ एवं सकर्षलक्षण पर्वणि तद्देवनौ उक्त विध उपास्य

म८१

२।।२

ध्यायमानः सुरासुरैः सिद्धगंधर्वविद्याधरमुनिभिः अनवरतं मुदितविह्वलविकललोचनः सुललितमुखरितामृतेनाप्या
यमानः स्वपार्षदविबुधयूथपतीन् अपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं
वैजयंतीं स्वां वनमालां नीलवासा एककुंडलोद्गलकंकुंदिरल सुभगसुंदरभुजो भगवान्माहेंद्रो वारणेंद्र इव कांच
नीकक्षामुदारस्तीलो विभक्ति ६ य एवमेतमनुस्मरतो ध्यायमानो मुमुक्षूणां मनादिकालकर्मवासनायोथितमविद्यामयं हृ
दय ग्रंथिं सत्त्वरजस्तमोमयमंतर्हृदयं गतो ध्यायमुनिर्भिनत्ति ७ ॥

१०३

मानउपासकानां मंतर्हृदयं गतः प्रहृति सं वधिनिरस्यतीत्याह य एष
भगवानंतं तः एवमनुस्मृतः उक्तविधेन गुरुमुखात् श्रुतः अभिध्यायमानः श्रोतव्यो मंतव्यो निदिध्यासितव्य इतिश्रुत्यर्थो ः ते मत्यभिज्ञातः
अतः सामर्थ्योद्भवलोके नैसर्गिक न इति लभ्यते मुमुक्षूणां संसारात्तानां मो हृमिच्छतां मनादिकाल प्रवृत्ताभिः कर्मवासनाभिर्योथितं स
त२ दर्भं मृविद्यामयं देहात्मभ्रांतिः स्वनत्राभत्रमांतिस्त्रपात्मनमयं ग्रंथिं प्रथिवत् दुर्मोच्यं सत्वरजस्तमोमयं सत्वादिगुणभेदचतुर्यस्त्रयसंबं
धम्मूलं मनादिकाल प्रवृत्तं कर्मवासनाविद्यात्मं ग्रंथिरूपं संसार इत्यर्थः आत्मस्वरूपे निर्भिन्नत्ति नाशयति ध्यानेन मुमुक्षूणां मंत
हृदये संनिहितः आत्मनि र्भिनत्ति नितरां निरस्यतीत्यर्थः ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रगडलेन २

सुभगत्वमाह यस्येति अशीनां पतयः सात्वतश्रेष्ठैः महत्तस्य संकर्षणस्यांघ्रिकमलयुगले ऽरुणा विशदानखा एव मणयस्तेषां कुंडलस्य मंडले
एकांतभक्तियोगेनाव्यभिचारेण भक्तियोगेनावनमंतः प्रणमंतः उक्तविधेषु नखमणिमंडलेषु प्रतिविंबिता निर्भाति मनोहराणि परितः स्फु
रंतौ कुंडलौ ययोस्तानि प्रभया मंडितानि गंडस्थलानि येषु तानि स्ववदनानि प्रमुदितमनो येषां तादृशाः संतः विलोकयंति किलेत्यर्थः ४ तथा नागराजकु
मार्यः आशिषः पुरुषार्थानाशासानाः कामयमानाः अस्य संकर्षणस्य चारुभिः सुंदरैरंगैर्देवलयेष्वविलसिताः प्रकाशिताश्च ते विशदा नि
धवलाः श्वेताः र्मलाः स्वविपुलादीर्घाः सुभगाः कोमलाश्च रुचिराः सुंदराश्च भुजा एव रजतस्तंभास्तेष्वगरुकुंकुमचंदनानां पंकेषु लेपस्ते मावलिं

प१

यस्यांघ्रिकमलयुगलारुणविशदनखमणिषंडमंडलेष्वधिहितं तयः सहस्रा त्वलक्ष्मे रेकांतभक्तियोगेनावनमंतः स्ववदनानिप
ति स्फुरत्कुंडलप्रभामंडलमंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ४ यस्यैव हि नागराजकुमा
र्यः आशिष आशासाना श्चारुवंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकु
मपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितम
दविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति ५ स एव भगवाननंतोनंतगुणार्णव आ
दिदेव उपसंहृतामर्षरोष वेगो लोकानां स्वस्तय आस्ते ६ ॥

पंकानामालेपनं कुंकुमलेपनं तं भुजानामभिमर्षेन उन्मथिते हृदये
मकरध्वजस्य कामस्यावेशो न रुचिरं ललितं च स्मितं येषां तथाभूताः सत्यः तस्य संकर्षणस्यानुरागमदमुदितमदविघूर्णि
तारुणकरुणावलोकनयनवदनारविंदं सव्रीडं यथा तथा विलोकयंति स्वामिनः मदेन स्वानुरागजनितेन च मुदितं मत्तमदेन
घूर्णितं च चलितं चइदं दरुणं च करुणावलोकं नयनं यस्मिन् तद्वदनारविंदमिति तस्यार्थः ५ उक्तविधः एवसंकर्षणाख्यो नंतस्त्रि
विधपरिच्छेदरहितः अनंतकल्याणगुणार्णवः आदिदेवः स्वतेजसा दीप्यमानः उपसंहृतः अमर्षरोषयोर्वेगः संहार
विषययोरमर्षक्रोधयोर्वेगो येन स भगवान् लोकानां स्वस्थये आनां स्वस्त्यर्थं सुखायास्ते निष्ठतीत्यर्थः ६

भ२

वि

यद्यप्येवं ज्ञेयं स्वरूपं तथापि भक्तानुजिघृक्षयैवं सांकर्षणं रूपं कृतवानिति कलिपुरुष मैर्व्वाण्येदंशकाइत्याह प्रतिरिति यत्र यस्मिन्
भगवतो देपुरिदृश्यमानं सदसत् स्थिदुचिदात्मकं जगद्विभाति स भगवानो स्माकं कृपयाऽस्मासु कृपयेत्यर्थः संकर्षजात्मनोऽभ्यपानेनि
मृतं य कुश्मलत्वं तन्न ति बभार दिव्यमंगलविग्रहरूपेणाभ्यवानित्यर्थः भक्तानां नोऽनुग्रहायैव निरतिशयस्वरूपयामवतिमिमाव भा
रेतिभावः कथंभूतं ज्ञेयं तस्मात् यद्यस्मान्मृगपतिः सिंह इवोदारवीर्यः यद्वा भूतयतेः श्विष्यत इति मृगाः पशवस्तेषां देवास्तेषा
मधिपतिः तद्देवतानां परमं चदेवतं पतिं पतीनां परमं परस्तादिति श्रुतः ब्रह्मादीनामप्यन्वेषणीय इति भावः अनेनाप्युदारत्वसू
च्यते उदारवीर्यः जगत्कर्तृत्वादिसामर्थ्ययुक्तः एवंभूतोपि स्वजनानामस्मा कं मनो स्पादानुग्रहीतुं स्ववशीकर्तुमिति यावत् अ
नवद्यामकर्मनिमित्तां लीलामादिपतिं सा त्वतर्षभानागराजकुमार्या दिस्तुवाराध्यत्व सात्वत तेषां मण्डलमण्डलभरणादिकं
त्वा भ॰

प्रतीति प्रकृकृपया बभार सत्वं संस्पृष्टं सदसदिदं विभाति यत्र यल्लीलां मृगपतिराददे नवद्यामादर्तुं स्वजनमनोऽस्युद
रवीर्यः १० यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा हंत्यंहः सपदिनृणामशेषमन्यं कं शेषा
द्भगवत आश्रयेन्मुमुक्षुः ११ ॥

पो लीलामाददे परिगृहीतवान् सात्वततंत्रप्रणेतृत्वं मत्साभारतेउक्तं सात्वतं विधिमा
स्थाय गीतः संकर्षणेन यः अस्मात् प्रवक्ष्ये तं धर्मं मनुः स्वायंभुवस्तथेति लीलामाददइत्यनेन सौलभ्यमुच्यते अनेन भैवत
त्कृतिमानुष्यानामपि वशइतितात्पर्यं १० एवंपरत्वसौलभ्ययोगैः समाश्रयणीयता हेतुरुक्तः अथनाम प्रभावपर्यालोचन
मापिमर्दवस माश्रयणीय इत्याह यन्नामेति आर्त्तः रोगादिपीडितः पतितः महापातक्यपि यस्य भगवतो नंतस्य यदृच्छया
त्रुतं अक्षस्मात् प्रलंभनाद्वा परिहासाद्वा यस्य नामश्रुतं चवास्यादर्त्तेन पतितेन बालादिस एव पतितादिः स्वपातित्यादिभिर्विमुक्तः
इतरेषामपि नराणामत्मानं स्मरतो मशेषमंहो दुरितं हंतीति अतः मुमुक्षोः परंपरयाप्येवाशेषदुरितनिरसनक्षमनामयो यस्तस्मात् संक
र्षणादन्यं कं शेषादपि आश्रयेदित्यर्थः श्रेयस्पतिदुरितभ्यो वशेषयतिस्वोष्मितमिति नामनिर्वचनमत्राभिप्रेतं ११ इत्थं ह्यनाद्यालि वर्ज्जं तेनांतरिदं दि

तस्य भगवतः संकर्षणस्य महिमानमनुभावं प्रभावं तुंबुरुणा सह स्वायंभुवः ब्रह्मणो नारदो ब्रह्मणश्चतुर्मुखस्य सभायां संश्लोकयामास व
र्णयामास ८ प्रथमं तावद्दृष्टेनैव स्वस्यानधिकारं द्योतनाय तत्त्वं तत्परस्य दुर्ज्ञेयत्वमभिप्रयन्कारणत्वेन तमुपलक्षयति उत्प
त्तीति अस्य जगतः उत्पत्त्यादिहेतुभूताः सत्वाद्याः प्रकृतिगुणाः सत्त्वरजस्तमोगुणाः क्रमेणात्राविवक्षिताः रजः सत्वतमोगुणाः
क्रमेण जगदुत्पत्त्यादिहेतुभूता यस्य भगवतः ईक्षया सिसृक्षया कल्पाः समर्थाः आसन् सृष्ट्यादि समर्था अभूवन्नित्यर्थः अनेन जगन्निमित्तका
रणत्वमुक्तं तदेहस्य वक्तृस्यामिति श्रोतस्य कर्तृत्व स्यात् अन्यत्वभिज्ञानात् निमित्तकारणत्वे नामत्वशरीरस्थत प्रकृतिपुरुष
कालानां स्वकार्यकारणपरिणामोपपत्त्यल्पमवर्णनाश्रमत्वं यथा कुलालादेः स्वकीयमृत्पिंडादेः रूपपरिणामोपपत्तेः स्वरूपं

तस्यानुभावं भगवान्स्वायंभुवो नारदः सह तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास ८ उत्पत्तिस्थि
तिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयासन् यद्रूपं ध्रुवमकृतं यदेकमात्मन्
थमुह वेद तस्य वर्त्म ९॥

नानाधात्क

अथ तत्त्वं अथोपादानकारणत्वेऽपि तमलक्षयति यद्रूपमिति आत्मन् आत्मनि स्वस्मिन् एव
ध्वादिनामरूपाद्यभावात् अविभागेन स्थितं प्रकृतिपुरुषौ चैव बलिष्ठवाद्वोरु भावमपि इति गीतोक्तेः कारणावस्थायामेव
म तं यद्रूपं प्रकृतिपुरुषात्मकं शरीरं तत्किंस्वद्धामेव रूपात्मनि नानाकृतं देवादिनामरूपविभागविभक्तं कृतमथारुह्य तदा
तस्य भगवतो वर्तते स्वरूपं लोके विलक्षणं रूपमुद्धृतं यथा वेदमादध्यादिति शेषः सर्वं मात्मनमविभागेन स्थितमात्मनि नानाकृतं
रूपमथादित्यनेनैकत्वनानात्वे आत्मपर्यन्तं इति विज्ञायते इदमेव हि तस्योपादानत्वं यत्सूक्ष्मप्रकृतिपुरुषगतदेवादि
विभागस्य स्वशरीरभूत प्रकृतिपुरुषपरायण्यात्मपर्यन्तत्वं अपि तु यथा सर्वमेकत्वेनात्मनि स्थितं पश्चान्नानाकृत
मात्मन्यथादित्यन्वयः धारणं चात्र अनेन विभिन्नप्रकाशनेन यथा ब्रह्मपरमात्मनः कारणत्वं कार्यत्वं च यदवि
भक्तनामरूप प्रकृतिपुरुषविषयं विभक्तनामरूपात्मा प्रकृतिपुरुषनियमनं चेति ज्ञातव्यं ९॥

श्रीभा॰
पं॰टी॰
९५
उल्लासे ४

सर्वेषां महदादि लोकमापकस्य समानत्वेपि कर्तृवैचित्र्यात् कार्यवैचित्र्यमुपपादयति कर्तुर्जीवस्य त्रिगुण
त्वात् सत्वादि गुण भेदभिन्नया त्रिविधया श्रद्धया कर्मणो गतयः फलानि पृथग्विधाः सर्वा एव गत्यादि
तारतम्येन भवन्ति ... सर्वगतत्वं नलदालिप्रथिव्यादिविदेवेष्वपि पुनः सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः उक्तरीत्या सर्वेषां
गुणत्रययोगे गुणानां ... दिरूपेण परिणाम एवाविशिष्टं ततिप्राचीनकर्मवासनानुगुणगुणत्रयपरिणाम एव स्यात् सात्विकादिभेदेन
धर्मस्य कर्तारो बहुयः प्रकारा ... सात्विक ... त्रिधा भिद्यन्ते तथाच गीतं भगवता मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः अयु
क्तः प्राकृतः स्तब्धः शठो ... विषादी दीर्घसूत्री च कर्ता तामस उच्यते प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं मोक्षं च

श्रीमूलम्॰ त्रिगुणत्वात् कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति २१ ... ...

या वेत्ति बुद्धिः सा पार्थ सात्विकी यया धर्ममधर्मं च कार्यं चाकार्यमेव च अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी अधर्मं धर्ममि
ति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्विकी राजसी चैव
तामसी चेति तां शृणु इत्यारभ्य यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः इति श्रद्धाया
स्त्रैविध्यमुक्तं सात्विकानां क्रियाः श्रद्धया युक्ताः नियतं संगरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते यत्तु कामेप्सुना
कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरुषं मोहादारभ्यते कर्म यत्तत्तामस
मुच्यते एवं स्थितेयं सात्विकः कर्ता सात्विक्याः बुद्धेः श्रद्धया धर्मं ... तिष्ठति सोनंतसुखं मोक्षं प्राप्नोति रजस्तमोभ्यां ... राजसो राजस्या
बुद्ध्या श्रद्धया धर्मं ... अनुतिष्ठति स महदादिलोकिकानन्तं प्राप्य परिमितसुखं प्राप्नोति ... श्रद्धातारतम्यकृतं सुखतारतम्यमेव भवति
यस्तु तामसः स स्मात् लोकान्नाप्याप्य विकेवलदुःखमेव प्राप्नोति महदादि लोकव्यापकः प्रकृत्यात्मधर्मस्तु राजसतामसयोः कर्त्रोः समानो भवतीति २

कर्तंयः
राम
१०५

105

मूर्द्धनीति गिरिभिः पर्वतैः सरिद्भिः सरिद्भिः समुद्रैः सत्वाज्जं सह यस्मिंस्तत् भूमंडलं यस्य सहस्रशिरसोऽनंतस्य मूर्द्ध्न्यणुवदर्पि
तं तस्य भूम्नो परिच्छिन्नस्यानंत्यादि वेलरोरियत्तयानविदितः विक्रमः प्रकारो यस्य तस्य तस्य वीर्याणि गुणान् गणयेत् कृपा
णि सहस्रजिह्वोपि कोवा गणयेत् दूतावर्तीति गणयेत् फणमांकरोतीति भावः १२ किंविशिष्टं भूमंडलं कमिव सर्षपमिव भर्त्तीति नेमा
ह एवंप्रभावः उक्तविधापरिच्छिन्नप्रभावः अनंत एवानंतः अनंतस्य दुरंतफलप्रदेत्यभिनिर्मिताश्रयेदुरंतमपारं वीर्यं यस्य
उरुगणास्तेषामनुभावाः प्रभावा यस्य स भगवान् संकर्षणः आत्मतंत्रः स्वतंत्रः आधारमेव यस्य एव मूलेऽतिलीलया स्थि
तये वस्थानाय पालनाय धृतिमान् तं पृथ्वीं विभर्ति १३ कालमुपसंहरति एताः इति कामान् कामयमानैः नृभिः उपगंतव्या

अथ मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नो भूगोलं सगिरिसरित्समुद्रसत्वं आनंत्यादविदितविक्रमस्य भूम्नः को वीर्याण्यधि
गणयेत्सहस्रजिह्वः १२ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः मूलरसायाः स्थितः क्ष्मातलं तो
यो लीलया क्ष्मां स्थितये विभर्ति १३ शुकः एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मविनिर्मिता यथोपदेश
मनुवर्णिताः कामान् कामयमानैः १४ एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा
विसदृशा यथाप्रश्नं व्याख्याताः १५ इति श्रीमद्भागवते पंचमस्कंधे पंचविंशोऽध्यायः २५ ॥ राजोवाच महर्ष एतद्

तत्र कर्मानुसारेण प्रवर्त्तमानस्य गतयः फलानि लोका इत्यत्र स्वर्गादिलोका एते सर्वे एव यथाक्रमं यथोपदेशं संप्रदायागत
तोपदेशमनतिक्रम्यानुवर्णिताः १४ एवं कर्मफलमुपसंहरन् राज्ञः प्रश्नावसरं दर्शयन्नुक्तागतयो न हि धर्मप्राप्याः इति प्रकृति
मुपसंहरति एतावतीति हे राजन् पुंसः संसारिणः प्रवृत्तिलक्षणस्य सकामस्य धर्मस्य विपाकगतयः फलरूपा गतयः नाना वि
धा विसदृशाः सुखदुःखतारतम्येनावस्थिताः एतावत्य एवेत्यर्थः यथाप्रश्नं व्याख्याताः वर्णिताः मया विशेषः १५ इति पंचमे
पंचविंशतितमः २५ प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय इत्यनेन नासंगतिर्मोक्षपदं न प्राप्यन्त्वोक्तेः केवलपापे गम्यास्तथैव
लोकाः सन्ति नरकाख्या इति स नितरां तेषां किंचित् ज्ञातुकामः पृच्छति लोकेषु सुखदुःखतारतम्येनावस्थितभावे लक्षणे इत्येवं निश्चित्यातो
वैचित्र्यदर्शनादिति वाकरणेच्छति राजा हे महर्षे एतद्यायसेति स्म सुखदुःखयोर्वैचित्र्यं मुनिना यत्नेन तत्र लोकेषु जीवलोकस्य सर्वे स्थितं भूतं तत्त्वे

श्रीभा. पं.टी. १०६ स्कं.५

न्तां दक्षिणां दिशं विशिनष्टि । यद्यपि नयस्यां दक्षिणस्यां दिश्यग्निष्वात्तादयः पितृगणाः परमेण समाधिना ध्यानयोगेन स्वानां गोत्राणाम् आत्मन आशिष आशासाना कुर्वाणाः एवं पाकं पचलीलि वल्लिदेशानिवसन्ति ७ यत्र ह स्वस्य दिशि पितृराज वैवस्वतो यमः संपरेतेषु मृतेषु पुरुषेषु इहैव स्वविषयं स्वदेशं प्रापितेषु जन्तुषु जीवेषु अनुल्लंघितमनतिक्रान्तं भगवतो नारायणस्य शासनं येन तथाभूतः सन् गणैः स्वकीयगणैः सहितः यथाकर्मावद्यं दोषमवद्यं

जुगुप्सितं कर्मैव कर्मावद्यं बहुत्वसम्बन्धाद्विरोध्य सपर्व निपातः यथाकर्मावद्यमिति पदत्रयं वा अवद्यं वेदशास्त्रजुगुप्सितं कर्म यतिक्रिष्टं हिंसादिकर्म यथा जन्तुभिर्विधावि नाय यो त्वं तदनुसारेणैव दोषं प्रति दमं दण्डं धारयति जुगुप्सितक

तेर

यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ७ यत्र ह भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति ८ तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः ९ तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपान

मिति दोषानुसारेण दण्डयतीत्यर्थः ७ तत्र नरकाः कतीत्यपेक्षायां एके नरकानेकविंशतिं गणयन्ति अत आह तत्रेति के ते इत्यपेक्षायां तान् नाम रूपलक्षणतः क्रमेण गणयन्नाह हे राजन् तान् नरकान् नामादिभिः अनुक्रमिष्यामः तत्र नामानि वाचकाः शब्दाः रूपाणि परस्परविलक्षणानि लक्षणानि चिह्नानि तत्तद्धिंसादिकर्माणि पापानि येषां तेन तादृशानि येषां ते चिह्नानि ... क्रमिष्यामः ८ तामिस्रस्तत्क्रमेण तु भ्यं वर्णयिष्यामः इत्यर्थः ९ तानेव क्रमेण गणनया दर्शयति तामिस्र इत्यादि नाम ये पानइत्यंते नरकेन तत्र कुम्भीपाकं कर्मलीलेयकोनरकः तथा आवीचिमदित्येकः एवमेकविंशतिनरका भवन्ति केचिदित्यत्र तु चिवीजं तत्रयेषांसत्रा

एम १०६

106

६८

एवं धर्मस्य कर्त्रादितारतम्येन धर्मेऽहं दर्शितेना यथेति यथा धर्मस्य कर्त्रादितारतम्येन मित्रस्तु विरूपफलतारतम्यं तथाप्रतिषिद्धलक्षणस्य
प्रतिषिद्धरूपस्याधर्मस्य कर्तुः श्रद्धायाः अधर्मेऽपि मित्रभूतायाः केवलतामस्याः श्रद्धायाः वैसादृश्याद्वा तारतम्यात्कर्मफलं विसदृशं वि
सदृशं तरतमं भवति ३ अथ वैसादृश्ये कारणं वदन्कर्मफले वैसादृश्यमेवोपपादयन्ति अनाद्यविद्येति अविद्या कामशब्दः कामनापरः
कर्मशब्दः तद्धेतुरनापरः फले कामनायाः अज्ञानफलत्वात् एकापात्रं विद्या अन्यत्कामात्मक कर्मफलकामनाश्चैव कर्मतारि
तानि पातिवासनानुरूपेण वासितानि तेषां वैसादृश्यादित्यन्वयः ते नानात्वेनावस्थितत्वाद्वैसादृश्ये तत्तत्सृतयो
गतयः फलरूपास्ते अनाद्यविद्यावत्तत्परिणामलक्षणाः अविद्याकामकर्मपरिपाकस्वरूपाः सहस्रशः आनन्त्येनावान्तरगत

कामन्याविद्या ४
चर

यथैवासौ प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति ३ अथ नान्याविद्याकामकर्म
णां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ४ राजोवाच नरका नाम भगव
न्किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ५ ऋषिरुवाच अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिण
स्यामधस्ताद्भूमेरुपरिष्टाच्च जलात् ६॥

प्राचुर्येणानुवर्णयिष्यामः ४ एवमुक्ते सति तस्मिन्नेतेन प्रवृत्ता सत्यस्तद्वस्थान
निचसाकल्येनवर्णनीया नीतिराज्ञः प्रश्नो यो गमालोच्य केवलं नमोऽस्तु मूलकालाय ज्ञानमण्डले कामकर्मपापानां पापानामवान्तरभे
देनावस्थानस्थूलरूपाणां तु वान्यमानानि कामानि तान्यल्पदुःख स्थानानामपि वक्ष्यन्ति सेनातिनिर्णयं सकलेनवर्णयितुमशक्यत्वात्तत्र प्रभृत
ऽवतरणात्तत्स्थानानि चकानि चिह्नानि विद्यामीत्याह तास्ताः प्राचुर्येण वर्णयिष्याम इति ४ एवमुक्ते राजा कालेन तद्वर्णनमप्यवि
ज्ञाय धर्मफलभुवः स्वामभूतस्थानानि नरकाः किं भवन्ति एव देशविशेषाः उत त्रिलोक्याः बहिर्वर्तन्ते उत अन्तराले अथो त्रिलोक्यान्त
लेवर्तन्त इति पृच्छति नरका इति देशमात्रमन्तिलोक्याः बहिः ब्रह्माण्डाद्बहिः बाह्या एषैव ५ ब्रह्माण्ड एव वर्तन्त इत्याह अन्तराल एवेति त्रि
जगत्या ब्रह्माण्डस्यान्तराले गर्भ एव तत्राधिकस्थानं दर्शयितुं दिशि दक्षिणस्यां भूमेरधस्तादुपरिष्टाज्जलादुपरिवर्तन्त इत्यर्थः ६॥

रौरवानुभवनिमित्तं पापं तं च वर्णयति यस्त्विह वा इति यस्तु पुरुषो इह लोके एतच्छरीरमहमेतदपत्यकलत्रादिकं ममेत्येवं रूपाभ्या
मदंकारममकाराभ्यां केवलं भूतद्रोहेण स्वकुटुंबमेवानुदिनं प्रपुष्णाति स इह लोके तत्स्वकुटुंबं विहाय स्वयमेक एव तेन स्वमेवाच
रितेनाशुभेन पापेन रौरवाख्ये नरके निपतति अमुनानेन निपातितेन यं वै इहलोके ये च जंतवो यथा येन प्रकारेण विहिंसिता
स्त एव जंतवः रुरवः रुरुसंज्ञाभूत्वा तेनैव प्रकारेण परत्र रौरवे नरके यातनाप्रयोगतः तमेव विहिंसंति यतस्तत्र गता रुरवो हिंस्य
तस्तेन रौरवमित्याहुरित्यर्थः केते रुरवः यत्र गतं हिंसंति इत्यत्राह रुरुरिति सर्पादप्यतिक्रूरस्य
अतिरौद्राख्यस्य सत्वस्य जंतोः रुरुरिति अपदेशो व्यवहार इत्यर्थः १३ महारौरवमनुवर्णयति एवमेवेति यथा रौरवे निपतितं

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तद
शुभेन रौरवे निपतति ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमे
व विहिंसंति तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः १३ एवमेव महारौरवो यत्र निपतितं पुरुषं
क्रव्यादा नाम रुरवस्तं क्रव्येण घातयंति १४ ॥

रुरवो हिंसंति तथा महारौरवेपीत्यर्थः प्रथमांतपाठे रौरवसदृश एव मह
रौरव इत्यर्थः स्वारस्यं तु रुरूणां हिंसनेन उभयोर्लालतो विशेष इत्याह यत्रेति यत्र महारौरवे निपतितं पुरुषं क्रव्यादा इति तत्र मांस
भुक्तो इति क्रव्यादाः तथाभूताः संतो रुरवः क्रव्येण निमित्तेन घातयंति निपतितं पुरुषस्यापि मांसं भक्षयंतीत्यर्थः तं क्रव्येणेति भि
न्नं क्रियात्वयश्रावणे अन्यथा अतिवाद्यो योजनीतो कर्मत्वविवक्षातः तेनेति तृतीयायाः क्रव्यमिति द्वितीया च स्यात् क्रव्येण निमित्तेन तेवा
दयंतीत्यर्थस्त्वसंगतः स्यात् क्रव्याश्यनेन पौनरुक्त्यात् यद्वा क्रव्यादः क्रव्यादनस्वभावाः अतएव क्रव्येण फलस्येव हेतुत्वविवक्ष
यां तृतीयायाः क्रव्यार्थं वा दयंतीति वेदोर्निर्वृत्तप्रेप्सया विदिरत्र दंशनपरं वा दयंति दंशंतीत्यर्थः अनेन रसेवं क्रिमिर्वा
हुं सूचितः १४ ॥ ss ४ ss ss ४

तिर

राम १०७

दार सिवर

उत्क्रान्ते वर्त्तिर्द्दिंशति किंचेत्यादिना सूचीमुखमित्युक्तेन एतेषां वैरवत्ति स्तामिस्रादिभिः सहाष्टाविंशतिर्भवन्ति एते नरकावि ।
विधयालनाम मयाऽदुःखाऽनुभवमयः १० तान्निकेवमात्स्त्रदृज्जभवतिमिस्रानिपातानिचवलियति यत्त्विदेत्यादिना मावक्ष्या ।
यसमाप्तिः योजंतुरिहलोके परस्यवित्तादीन्यपहरति सहियमदूतैरतिभयंकरैः कालपाशेन यमपाशेन बद्धो बलात्तमिस्राख्ये
नरके निपात्यते तामिस्रे विशिनष्टि तमिस्रप्राये तमःप्रचुरे तामिस्रे निपात्यमानः जंतुरनशनपानदंडप्रहारभर्त्सनादिभिर्या
तनाभिः पात्यमानः पीड्यमानः कश्मलं दुःखमासादितः प्राप्तः क्वचिदेव तद्देवमुह्यति स्म ... तामिस्त्रादिना तृ५
निर्दि. मोहं योगरूलानीतिश्रुतिरिति ११ एवमिति यथातामिस्रे दुःखानुभवः एवमंधतामिस्रेपीत्यर्थः तद्दुःखभवनिमित्तं पापमा

किंच क्षारकर्दमो रक्तोगणभोजनः शूलप्रोतो दंदशूको वटरोधः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिन
रकाविविधयातनाभूमयः १० यस्त्विह वा एष पतिविलापयकेलन्नात्यपहरति सहिकाले पाशबद्धो यमपुरुषैरति
भयानके तामिस्रे नरके बलान्निपात्यते अनशनानपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जंतुय
त्र कश्मलमासादितः एकदैवमूर्छामुपयाति तमिस्रप्राये ११ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादी
नुपभुंक्ते पत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमू
लः तस्मादंधतामिस्रं तमुपदिशन्ति १२ ॥

इयत्तु मेंत्तु जरुवंपतिं वंचयित्वा लग्दरादीन् आदिशब्दाद्धं[illegible]पत्यादी ना१
निच यो उपभुंक्ते स्वापत्यनाममकरले तस्येवं भवेति एवं शेषान्वयः अंधतामिस्त्रे यतामिस्रात्कोविशेष इत्यपेक्षायां त
मिस्रात्तं विशिनष्टि यत्रेति यत्रांधतामिस्त्रे शरीरी देही निपात्यमानः यातनाभिः तीव्राभिः पीड्यमानः तीव्रवेदनया न
ष्टामतिर्यस्य नष्टा दृष्टिश्चयस्य तादृशो भवति वृश्च्यमानमूलस्य तादृशो वनस्पतिर्मध्यापततीति दृष्टांतः अस्मा
त्कारणात्तं नरकमंधतामिस्रमिस्रमित्यादिशंतीत्यर्थः १२ ॥ ॥

नि २

श्री भा. पं. टी. १०८

जवेदपथात्स्ववर्णाश्रमोचिताद्वेदविहिताद्धर्मात् अनापद्यपगतः अतिक्रांतः आपदत्र देशकालवैपरीत्यप्रयुक्ता रोगादिनिमित्ता शक्तिः अनापदि गतस्त्यक्तेन आपदि स्वधर्मत्यागो न दोषावह इति सूचितं पाषंडमवैदिकं मतं स्मार्तं च केवलस्वमनीषया कल्पितं मतं एवं कुपथं कुत्सितं मार्गमाभासधर्ममुपगतस्तं देहिनमसिपत्रवनाख्यं नरकं प्रवेश्य प्रविष्टं कृत्वा कशया प्रहरंति यमभटा इति शेषः कशा हि नाम अश्वादीनां ताडनार्थं निर्मितो दंडाग्रे रज्जुविशेषः एवं कशया ताडितः तत्रासिपत्रवने आसादितः इतस्ततो धावमानः तीव्रदंडमसहमानो उभयतो धारैः पार्श्वद्वयेपि धारा येषां तैः खड्गस्य द्वे धारे पार्श्वधारा एभिस्सूभयतोधारैरित्यर्थः तालवनस्थासिपत्रैः खड्गसदृशैः छिद्यमानानि सर्वांगानि यस्य तादृशः हाहाकारपूर्वकं हतोस्मीति वदन्परमया तीव्रया

यस्त्विह वै निजवेदपथादनापद्यपगतः पाषंडं चोपगतः तमसिपत्रवनं प्रवेश्य कशया प्रहरंति तत्र हासौ इतस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोस्मीति वदन्परमया वेदनया मूर्छितः पदे पदे निपतति स्वधर्महा पाषंडानुगतं फलं भुंक्ते १५ यस्त्विह वै राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पीष्यमाणावयवो यथैवेहेक्षुखंड आर्तस्वरेण स्वनयन्क्वचिन्मूर्छितः कश्मलमुपगतः यथैवेहादृष्टदोषा उपरुद्धाः १६ ॥

वेदनया पदे पदे मूर्छया निपतति एवं स्वधर्मेहा स्वधर्मत्यागी पाषंडानुगतं पाषंडधर्माभासानुगतं फलं दुःखमनुभवन् असिसदृशानि पत्राणि येषां तैस्तालवनमित्यन्वयवाक्यार्थः १५ अथ सूकरमुखं नरकं तत्प्राप्तिनिमित्तं पापं चानुवर्णयति यस्त्विहेति इह लोके राजा वा राजपुरुषो वा यः कश्चिददंड्ये अदंडनार्हे दंडं दंडनं प्रणयति कारयति दंड्योपि ब्राह्मणस्तं शरीरदंडं वा कारयति वपनं दंडविधानं तस्यास्ति पापं तथा एष हि वसवे धनं वधो नान्यस्तु दैहिक इत्युक्तेः स्यादवध्योपि ब्राह्मणो देहदंडानर्हः यः शरीरे दंडं कारयतीत्यर्थः स पापीयान्सूकरमुखे नरके निपतति तत्र नरके सूकरस्येव मुखं येषां तैर्जंतुभिः नितरां पीड्यमाना अवयवा यस्य

२५४३

अथ कुम्भीपाकं नरकमनुभवति मितं पापं वर्णयति यस्त्विति यः केवलं देहंभरः शरीरपोषणमात्रपरः यश्चोक्तलोके उग्रः क्रूरः
पशुपक्षिणः प्राणतः सजीवान् उपरन्धयति पचति तमपकरुणं निःकृपं पुरुषादैरपि विगर्हितं अमुत्र कुम्भीपाके
यमानुचराः तप्ततैले उप[illegible]यन्ति पचन्ति [illegible] तत्र तैलकुम्भी पाच्यते यत्र स कुम्भीपाक इत्यवयवार्थो विवक्षितः ॥१३॥
अथ कालसूत्राख्यं नरकमनुभवति मितं दुरितं वर्णयति यस्त्विह लोके पितृदेवब्राह्मणद्रुक् स कालसूत्राख्ये नरके
अयुतयोजनपरिमण्डले यस्य तलं ताम्रमयं विकारः खले खलेवत्समे खलो नाम यथा निविडपीडितं विशेषः
उपर्यधस्तादग्न्यर्काभ्यामधस्तादग्निना उपर्यर्केण चाभितप्यमानेऽभिनिवेशितः परितः पातितः क्षुत्पिपासाभ्यामंत

न्या ५

यः केवलं देहंभरः यस्त्विह वा उग्रः पशून्पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममु =
त्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ॥१३॥ यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुत ६
योजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानोऽभिनिवेशितः क्षुत्पिपासाभ्यां च द ६
ह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्रा

७३

दशर्क २ वहिः १

वहिश्च दह्यमानं शरीरं यस्यासौ दह्यमानान्तर्बहिःशरीरः पूर्वनिपातः अन्तः शरीरं बहिः शरीरं अन्तर्बहिः शरीरं चेति पञ्चम्येति समासे वहिःश
ब्दस्य उपसर्जनात्पूर्वनिपातः अत एव समासविधानात् सम्पर्का द्विगद्योः ... शरीरं पृथिव्यादिः
...थः अन्तःशब्देन संनिधाना ... शरीरं चयस्येति एवं ... नाम
मध्ये फलके उपवेशनादिकं ... परिधावति ... यावन्ति पशोः रोमाणि तावत्संख्यानि वर्षाणि
सहस्राणि ... एवं तयान ... भवेत्कालः ... जायते यस्मिन्स कालसूत्र इत्यवयवार्थो नाभिप्रेतः ॥१४॥ एवं का
लसूत्रमभिधायाथासिपत्रवनं नरकं तन्मितं निमित्तं च वर्णयति यस्त्विह वा इत्यस्तु देहीति ॥

च

श्रीभा॰ पं॰ ५

अथायःसंदंशाख्यं नरकं पापविशेषं चाह यस्त्विति इह यो देही स्तेयेन चौर्येण वा अनापदि ब्राह्मणस्यान्यस्य हिरण्यपरत्नादीन्यपहरति तं देहिनं परत्र संदंशाख्येन नरके राजन् यमभटाः अग्नितापैः संतापेनाग्निवर्णतामापन्नैरयस्मयैः लोहमयैः संदंशैः संदंशास्त्वेभिः संदंशाः तैः छेदनैः त्वचि निष्कुषन्ति छिंदन्ति संदंशा यत्र इति संदंशाख्य इत्यवयवार्थः अथ तप्तसूर्मिं पापं चाह यस्तु देही स्वयं पुरुषः सन् अगम्यां भगिनीमातादि स्त्रियमनुगच्छति स्वयं योषित् स्त्री सती अगम्यमपि तमयोग्यं पुरुषं चोपगच्छति तं देहिनं अमुत्र सूर्मिसंज्ञे नरके कशया ताडयन्तः लोहमय्या तिग्मया तप्तया सूर्म्या स्थूणयैव स्त्रीरूपेण पुरुषरूपेण चोक्तौ अग्नितया सूर्म्या प्रतिमया पुरुषं पापिनं मालिंगयन्ति स्त्रियं पापिनीं पुरुषरूपया सूर्म्यालिंगयन्ति तप्ता सूर्मिर्यस्मिन् स तप्तसूर्मिरित्यवयवार्थः २२ अथ वज्रकंटकशाल्मलीमाह यस्त्विति सर्वाभिगमः

स्कं॰ ५

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिण्डैः संदंशैस्त्वचि निष्कुषन्ति २१ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिंगयन्ति स्त्रियं च पुरुषरूपया सूर्म्या २२ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षन्ति २३ ये त्विह वै राजन्या राजपुरुषा वा अपाखंडा धर्मसेतून् भिंदन्ति ते संपरेत्य वैतरण्यां निपतन्ति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः ॥ ॥

१०७

लोभादसेव्यसेवी पश्वाद्युपगंता तिर्यक्षु चाचरते तं सर्वाभिगममुत्र निरये वज्रकंटके शाल्मलीसंज्ञके वर्तमानं पतितं वज्रमयानि कंटकानि यस्यां तं शाल्मलीवृक्षमारोप्य निष्कर्षन्ति इत्यर्थः वज्रकंटकशाल्मलिर्यस्मिन् स इत्यवयवार्थः २३ वैतरणीं वर्णयति य इति। राजन्याः क्षत्रियास्तेषां पुरुषा वा अपाखंडा वैदिकान् धर्मसेतून् धर्ममर्यादां भिंदन्ति नाशयन्ति कथंभूताः भिन्नमर्यादाः त्यक्तधर्ममर्यादाः ते राजन्यादयः तस्यां वैतरण्यां नरकस्य परिखाभूतायां नद्यां यादसां गणैरितस्ततः भक्ष्यमाणा अपि आत्मना देहेन अवियुज्यमाना अत्यक्तदेहा इत्यर्थः तत्र हेतुः असुभिः प्राणैरुह्यमानाः कर्मणा कृतेन विवशायां तस्यां तत्र तीया धमनाणा

राम २०५

अथांधकूपं वर्णयति तस्य निमित्तं च यस्त्विह वा इति यस्त्विह देही संसारे ईश्वरेणोपकल्पिता मनुष्यस्य कृष्यादिरूपा वृत्तिर्येषां अविविदितापरस्य
व्यथा यैरविवेकिभिस्तेषां मत्कुणमशकादीनां भूतानां व्यथामाचरति करोति कथंभूतः स्वयं पुरुषोपकल्पि
तवृत्तिः परमेण परमपुरुषेणोपकल्पिता वर्णाश्रमादिविभागेन विधिनिषेधरूपा विकल्पिता वृत्तिर्यस्य विविक्ता विविच्य ज्ञाता पर
स्य व्यथा येन विवेकी सन्नित्यर्थः स एवंविधो भूतः अंधकूपे तदभिद्रोहेण निमित्तेनांधकूपाख्ये नरके निपतति तत्राथ रू
पे हंतीति खेदः सोपतितस्तैस्तैः पूर्वहिंसितैः ... जंतुभिः कीदृशैस्तत्र दर्शयति पशु इत्यादिना तेषां मध्ये ये केचिद्
चाभिद्रुग्धा हिंसितास्तैः सर्वैः पश्वादिरूपैस्तापकैः सर्वतोभिद्रुह्यमाणो तैरेव विहता निद्रानिर्वृत्तिर्निद्रासुखं यस्य सः नेत

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति
स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जंतुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये
के चाभिद्रुग्धास्तैः सर्वतोभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः १७ य
स्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपत
ति तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताहुतादोऽनिर्वेश

अथ नवस्थानं येन तथाभूतस्तमस्यंधकारे परिक्रामति ... कुशरीरे व्याध्यादियुक्ते देहे संचरन् अन्ये शरीरे जीवो यथा
लब्धनिद्रः खिद्यति तथेत्यर्थः अंधकारात्तमः ... १७ अथाष्टमं कृमिभोजनं नरकं तद्धेतुभूतं पापं च वर्णयति यस्त्विह देही इ
हलोके यत्किंचिदादिकं दैवादुपनतं प्राप्तमन्नं असंविभज्य अतिथिभ्योऽदत्त्वेत्यर्थः अश्नाति स्वयमेव भुंक्ते अनिर्मितपंचयज्ञो न
अनुष्ठितपंचमहायज्ञः स वायससंस्तुतः वायसैः समत्वेन वर्णितः परत्र परलोके कृमिभोजनाख्ये नरकाधमे निपतति तत्र शतसहस्रयोजने कृ
मपरिमिते कृमिकुंडे स्वयमेव कृमिभूतः कृमिभिरेव भक्ष्यमाणः कृमिभोजनः सन् कृमीनेव भुंजन् यावद्यावत् योजनानि कृमिकुं

श्रि

निम्नितं४

श्रीभा॰ पं॰ टी॰ ११० नूतन ४ २१

सपापं लालाभक्षमनुवर्णयति यस्त्विह वै सवर्णामिति इह लोके यो वै द्विजः कामेन मोहितः सवर्णां भार्यां रेतः स्वरेतः पाययति पा
नं कारयति तं द्विजं पापकृतं रेतःकुल्यायां पातयित्वा रेतः संपाययंति यमपुरुषा इति शेषः लाला रेतः तस्य भक्षणं यस्मिन्स
लालाभक्षः इत्यवयवार्थः अथ सारमेयादनं तं पापमनुवर्णयति ये त्विह वै दस्यव इति इह ये दस्यवो दुष्टसत्वाः केतनं गृहदाह
कालीना दाहकाश्चाग्निदाः विषदायकाश्च गरदाः राजभटाः ग्रामस्य ग्रामं ग्रामाकरं वणिक् सार्थान् जीवसमूहान् वा विलुंपंति छिंदंति
हिंसंतीत्यर्थः तान् संपरेतान् वज्रवल्लि दंष्ट्रा येषां ते यमदूताः श्वानः विंशत्यधिकसप्तशतसंख्याः सरभसं सत्वरं
निखादंतीत्यर्थः निरवपातनात् ... सारमेयाणां ... सारमेयकर्तृकमदनं यस्मिन्निति अवयवार्थः २९ अथावीचिम

यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां रेतः संपाययंति २८ ये त्विह वै द
स्यवो राजानोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुंपंति राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशता
नि विंशतिश्च सरभसं खादयंति यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधः
शिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशी
र्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ३०॥

पातयित्वा १

तं सपापं वर्णयति यस्त्विह वा अनृतमिति यस्त्विह लोके देही सा
क्ष्ये कर्मसाक्ष्ये तस्मिन् द्रव्यविनिमये क्रयविक्रयादिरूपे वाणिज्ये वा दाने वा कथंचिद्यदनृतं वदति तेन अवीचिमति नरके निरवका
शे निरालंबे योजनशतपरिमितोन्नतात् पर्वतशिखरात् अधःशिराः निपात्यते अवीचिमच्छब्दस्यावयवा
र्थमाह यत्रेति यत्र नरके अश्मपृष्ठं पाषाणतलं जलमिवावभासते तदवीचिमत् वीचिस्तरंगः तदस्यास्तीति वीचिमत् जलं
न विद्यते वीचिमत् यस्मिन् सोऽवीचिमत् जलरहितमश्मपृष्ठं जलमिवावभासते तदवीचिमदित्यर्थः एवं निपात्यमा
न पापी तिलशस्तिलमात्रशः विशीर्यमाणं शरीरं यस्य तथाभूतोपि न म्रियमाणः मरणमप्राप्तः पुनरपि तथैवारोपितो निपत

वदति २

ता ११०

110

स्वाद्येनेति स्वकीयदुरितेन कर्मपाकं स्वकीयं पापकर्मफलं इदं इत्येवं स्मरंत उपतप्यन्ते क्लिश्यंति नरोत्तिविशिष्टमहि विष्णुत्रेति स्वयं उधि
विण्मूत्रत्रपं यविड्वादीमांवाहित्वा क्रिडादेनावादः प्रवादः [illegible] मस्तीति तथा [illegible] नरोत्पयेवायने कइत्यन्वयवार्थभेदः २४ अथ
वृषलीपतेर्दण्डमाह यस्त्विति ये द्विजा इह वृषलीपतयः [illegible] दयाः [illegible] शूद्र्याः पतयो नष्टाः स्मृताः शौचाचार विधूयते तत्र शौचं
लोकमर्यादा [illegible] आचार संध्योपासनादि नियमः भक्ष्याभक्ष्यादि नियमः एतेषां त्यक्तालज्जायेते पशुचर्यां स्वेच्छाचारं कुर्वंति
पापकं वृषली निवलि द्वेषः तेपि [illegible] विड्वादिभिः पूर्णेषु [illegible] निपतंति तदेव विड्वादिकमेवाति [illegible] इति
मयमुदकं [illegible] इत्यन्वयवार्थः २५ अथ प्राणनिरोधं संपालवर्णयति [illegible] नाचपतयः पालकाः [illegible] मगयेव वि

स्वाद्येनकर्मपाकमनुस्मरंत उपतप्यन्ते विण्मूत्रपूयश्लेष्मके शनखास्थि मेदो मांसवसावाहिन्या मुपतप्यन्ते २४ येत्विह
वै वृषलीपतयो नष्टशौचाचार नियमास्त्यक्तलज्जाः पशुचर्यां चरंति ते चापि प्रेत्य विण्मूत्र श्लेष्ममलापूर्णार्णवे निपतं
ति तदेवातिवीभत्सितमश्नंति २५ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि संपरेतान् लक्ष्य
भूतान् यमपुरुषा इषुभिर्विध्यंति २६ ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति तानमुष्मिँल्लोके वैशसनाम नरके पतितान्निर

हारोये पालेः तीर्थे मृगान्निघ्नंति [illegible] तीर्थे सलोकस्यलक्ष्य [illegible] त्वाभावात् तस्मिन्पयोदेशे वह: तीर्थे च तु प्राणिसंचाराय न लोकेद्वहत्वधो
न दोषाय भवति यत तस्मात् तीर्थे इत्युक्तं तदन्यविषया इत्यर्थः [illegible] नरास्तेद्दमानानार्ता हं तेमयर्थः इषुभिर्बाणै
र्यमभटा विध्यंति ताडयंति विध्यंती त्यनेन प्राणत्यागोर्थान्निष्पन्नः प्राणानिरोधः इति संज्ञा प्राणानां निरोधाय
निमित्त इत्यन्वयवार्थः २६ अथ पशुपापंविशसनं वर्णयति ये त्विह वै दांभिका इति इह लोके ये वै द्विजाः दांभिकालोकवंचकाः [illegible] तेष
वयमपि यज्वानः स्म इति दांभिका लोकमार्गे यज्ञेषु पशून्विशसंति हिंसंति तान्दांभिकान्मुष्मिन्वैशसना
म्नि नरके निपतितान्निरयपतयः यमपुरुषाः पालयित्वा दुःखयित्वा विशसंति विहिंसंति यस्मिन्संवशसा एव वैशसं इत्यन्वयवार्थः २७

श्रीभा० पं० टी० १११

अथ शूलप्रोतं तत्रापि श्रीरेत्तुदरीतं च वर्णयति ये त्विह वा अनागस इति ३२ ग्रामेऽरण्ये वा अनागसो निरपराधान् जीविषुनपि शूलसूत्रे
तु न्यस्य वैश्रम्भेनो वैश्रम्भिकैर्विश्वासोपायैरुपविश्रम्भय्य विश्वास्य शूलसूत्रादिषु प्रोतानर्मलयान् रक्तत्वेन क्रीडनकतया क्रीडार्थं यातयन्ति
तेऽपि च यमयातनासु प्रेत्य शूलादिषु प्रोताः शूलेत्याः आत्मानः देशायबो क्षुत्तृड्भ्यां पीडिताः श्चेति
तिग्मतुण्डैः सर्वतो भक्षयन्ति कङ्कवटादिभिरितस्ततो हन्यमाना आत्मशमलं स्वीयं पापं स्मरन्ति वाविय
शूलेऽपि स्मरन्ति शूलेष्वशूलादेशेनात्मस्मरन्ति शूलप्रोतमित्यवयवार्थः ३३ अथ दन्दशूकसपापमाह ये त्विह वै भूतानीति
ये चेह नरा उल्बणस्वभावाः उग्रस्वभावाः यथा दन्दशूकाः सर्पास्तद्वद्भूतानि उद्वेजयन्ति भीषयन्ति तेऽपि प्रेत्य दन्दशूका

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रम्भकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया
यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना
आत्मशमलं स्मरन्ति ३४ ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति
यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ३५ ये त्विह वा अन्धावटकुसूलगुहादिषु भूतानि
निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ३६॥ ... दन्दशूकसंज्ञेन नरके नि

पतन्ति दन्दशूकं विशिनष्टि यत्रेति हे नृप यत्र दन्दशूके दन्दशूकाः सर्पाः पञ्चमुखाः सप्तमुखाश्च येषां ते उपसृत्य समीपमागत्य ग्रसन्ति
यथा बिलेशयान्मूषकादीन् ग्रसन्ति तद्वत् दन्दशूकाः सर्पास्तेषां नरकं दन्दशूकमित्यवयवार्थः ... ३५ अथ सपापमवट
माह ये त्विह वा इति ये इह लोके अन्धावटकुसूलगुहादिषु अन्धावटादिषु भूतानि निरुन्धन्ति यथा ... तत्रापि
ते ताम् अमुत्र तेष्वेव नरके तेष्वेवावटादिषु ... उपवेश्य सगरेण विषयुक्तेन वह्निना धूमेन वह्निसंबन्धिना धूमेन निरु
न्धन्ति अवटे निरोधो ... निरोधः ... निरोधा अवटनिरोधाय ... इत्यवयवार्थः ३६॥

राम १११

सउरितमयः पानमाह यत्त्विह वे विप्र इति यो विप्रस्तत्र तत्त्रैवासुरां पिबत्यसौ पिबान्न तस्थुः राजन्यो वै यो वा सोमपानात्सोमपीथः स
तमोमपान इत्यन्वयः तयोः सोमस्थाने फलञ्च सम्यविधानाद्बत्या चतुर्गतिः त्वयोयस्तु पिपीरा हल्पताः संपिबन्दधिसुरा स तस्मै
लंप्रयच्छेत् सोममिति सलिनीः फलानि दृष्य निदृष्य तेषां विप्रादीनिर्यथा पापिनां तां उरसि पदा पादेनाक्रम्य हृद्व मार्ग मस्यं तता पैम
दीक्षितं कालाय समयाविशेषे तेषां मारोऽवेनि जिघांसति अयसः पानं यस्मिन्नित्यवयवार्थः २१ अथ पापंलोकं इम माह यत्त्विह
गात्मेति यो देही हलोके स्वयंजन्मादि भिरथमः निरुत्साह स्वस्वसंभावले नो लु स्यापादने तजन्मादि मरः अले एव वैयस्य
ष्टा लदु मन्येत किं त्वयमन्ये तस्मध्यः स सर्वमत्र आप एव स्त्वा ह्मार कर्दमे नरकेऽर्वाक् शिरा त्मथ शिरानि पातित अपार पात

यत्त्विह विप्रो राजन्यो वै यो वा सोमपीथस्तन्तत्त्वं सुरां सुतस्यो पिबति अमादत्तस्तेषां निरय नीला का पर सि पराक्रम्यासे
वक्ति नोद्वमाणं कालाय संनि जिघांसति २१ यत्त्विह धर्मात्मसंभावनः स्व य प्रभु मोऽन्यस्य योविद्याञ्चार्वन्ति श्रमवृत्तो वरीयस्तो
न वदु मन्येत सम्मलकर एव स्त्वा ह्मार कर्दमे निरयेऽर्वाक् शिरा निपातितो दुरन्तया तनानास्यश्नुते २२ यत्त्विह देवपुरु
षा अर्ह पुरुषमेधेन यजंते या स्त्रियो नृपशून्खादंति तांश्च ते पशव इव निहता यमसदने यातना रक्षो गणाः सौनि
का इव स्वधितिना वदाय स्रक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः २३ ॥

नात्रभुतेनभवति तादृशमोयस्मि
न्नित्यवयवार्थः २२ अथ रक्षोगणभोजनं नरकमाह ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते वधे कुरुषस्य मेधेन हिंसया भद्रकाल्यादि
देवताय जेरन् याश्च स्त्रियः अथ रक्षोगणभोजनं निदिश्यन्ते ते घोर ये तिलाश्च ता नेवपा स्त्रियो ये से वारोधस्तांश्च पुरुषां तामस्त्री
रित्यर्थः नृपशवस्ते निहताः सर्वे यमसदने रक्षोगणैरुक्तायातनाम् निहताः इति सौनिका स्वधिना नाम देवतां वधस्थाने तत्र भवाः
विशसिता अवदाय भक्षयन्ति नृत्यन्ति गायन्ति च स्वाद्वसृग्निपानात् हृष्यमाणाः यथा इह पुरुषा हृष्यमाणाः
सौनिकैर्वि मन्तस्तत्र यत्र स्रक् पिबन्ति यत्र रक्षोगणभोजनं यस्मिन्नित्यवयवार्थः २३ ॥ ॥ ॥ ॥ ॥

री५

दाहू८

उत्साहपुर २ । ८१ स्कन्ध ५

इदं नरकवर्णनं पापुवर्णनं च दिङ्मात्रमित्याह एवंविधा नरकाश्च शतशः सहस्रशश्च यमालये सन्ति तेषु सर्वेषु अधर्मवर्तिनः अनुक्तानुक्ता च
(उ)द्विधाः अधर्मपर्याये च ये उदिताः केचिच्च अधर्मवर्तिनः उक्ताः तेषु नरकेषु निपतन्ति पुनः पर्यायेण तस्मिन् विशन्ति यथाक्रमं पुनः नरकेषु विशन्ति तथा ते ऽपि विशन्ति इत्यर्थः यथा तस्य वेषुस्तरेणान्वयः यथा अधर्मवर्तिनो नरकेषु विशन्ति एवं धर्मानुवर्तिनः स्वर्गे विशन्ति स्यात् । तथा वेत्ति इतः स्वर्गादेः इह लोके वर्तनीयत्वात् इहलोकं प्रतिपन्नं मेघवन्तं पुनः भवाज्जन्मयाम्येवं इह लोके मर्त्यलोकादेः उभयशेषाभ्यां धर्माधर्मशेषाभ्यां भुक्तावशिष्टाभ्यामित्यर्थः निविशन्ति जायन्ते इत्यर्थः एवं प्रवृत्तिधर्मवर्तिनां मार्गः कथितः अथ निवृत्तिधर्मस्य मार्गः आदावेव द्वितीयस्कन्धे एवं व्याख्यातः विरक्तये सागरः मुक्तमायायाः समुपपन्नः तात्पर्येण कथितः इत्यर्थः ३९ एवं न । १ के षडको

एवंविधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिता
श्चापि निपतन्ति पर्यायेण विशन्ति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे चोभयशेषाभ्यां निविशन्ति
निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ३९ एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते
[margin:] ३१ तेषु २

स्वांतर्भूतत्वेनोपवर्णितेषु सत्सु वर्तिष्यन् अत्र आदिभुवनानि किं सन्तीति राज्ञः प्रश्नो ऽयोगमन्वीक्ष्याह एतावानिति अण्डकोश
एतावानेवोक्तविध त्रिलोकात्मक एवेत्यर्थः ननु चतुर्दशभुवनात्मकः त्रिलोकाव्यवहारः कथमिति शङ्कां निरस्यन् अण्डकोशं विशिनष्टि य इति यो ऽण्डकोशः त्रिलोकात्मकः पुराणेषु चतुर्दशधा चतुर्दशभुवनात्मकत्वेन विकल्पितः विभेदितः उ
च्यते अतलादीनि भुवनानि लोके मदहादीनि दिवो मण्डलं स्वर्गान्तरिक्षमण्डलं सह त्रिलोकात्मकोऽण्डकोशः उपवर्णितः
अवान्तरभेदात्मा स्थितः पुराणेषु चतुर्दशधा पर्यवसित इत्यर्थः ४० एतदण्डकोशवर्णनं श्रवणेन भवनादिकं फलमनुवर्णयति
य एतदिति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

धो१

स्मि ३

अन्ति पर्यावर्ते सङ्गरितमाह यस्त्विद्वा अतिथीनिति यस्मिन् लोके स्वयंयद् स्वामी सन्नतिथीन् अभ्यागतान् ज्ञात्वा बालसमकदुपगतान् मन्यु संजातक्रोधः दृष्ट्वापि दुरिवपापं जातिरुद्धाने अचक्षुषा निरीक्षते तस्य च पापदृष्टेः प्रेतस्य तिर्यग्गतिप्राप्तिरवर्ता पदेनीरीनेत्रे वज्रतुण्डैर्यौतकाकादयः प्रसह्य बलादुत्पाटयन्ति अत्र लोके पर्यावर्तनं उत्पाटनं भवति तदवयवार्थः ३७ स्त्वीतुदेव पापमाह यस्त्विद्वात्मात्स्याभिमानितिरिति यस्मिन् लोके आत्मपोहं मितभिमतिरभिमानो यस्यस्य तथानृणवेवानिरव्यर्थः अहंकृतः श्रेष्ठाद मिति मानी तिर्यग्प्रेक्षणं यस्य सर्वानववीदृशपिशङ्कोधर्मचौरस्थितस्यौ लिङ्गकमानः व्ययो विनियोगमार्थेत्वयः विनश्यसमल

यस्त्विद्वात्मातिथीनभ्यागतान्वाग्दृष्टिते ? मरुदुपगतं मन्युर्दिधक्षुरिवपापेनचक्षुषा निरीक्षते तस्य चापि निरयेपापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः काककङ्कवटादयः प्रसह्योरुबलादुत्पाटयन्ति ३७ यस्त्विद्वा आत्माभिमानितिरदृष्टः तिर्यक् प्रेक्षणः सर्वतोऽभिशङ्की यविनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतस्यग्रहवान्धमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ३८॥

व्या २

सःत्वयः तद्विषयाचिंतपापरिशुष्यमाणं हृदयं वदनं च यस्य सः अतः निर्वृतिसुखमननुभवन् अनवाप्तः यद् इवपि शाचवत्वा धृवित्तमभितो रक्षति स चापि प्रेत्य तस्यार्थस्योत्पादनादिभिः शमलं पापं गृह्णातीति तथा उत्पादनं प्रथमतो मेलनं संपादनं उत्कर्षणं तस्य पश्चाद्वृद्ध्यादिना वर्धनं रक्षणं पालनं एतत्त्रयरूपं शमलग्रहः इत्यर्थः स सूचीमुखे नरके निपतति सूचीमुखत्वं हि निरुक्ति यत्रेति तं वित्तग्रहं धनपिशाचं महान्तं पापपुरुषं पापकर्तारं धर्मराजस्य पुरुषाः सूत्रधारकाः तन्तुवायका इव तन्तवः तन्तुवायकारिण इव सर्वेष्वङ्गेषु सूत्रैः परिवयन्ति सूत्रप्रोतान् कुर्वन्ति सूच्यः परितः नरकावयवार्थः स्पष्ट एव ३८॥

महापुरुषस्य भगवतो नारायणस्य यत्स्थविष्ठं स्थूलतमं रूपमात्ममायागुणमयं प्रकृतिगुणप्रचुरमनुवर्णितं तदादृतोयः नृकुलेन रूपमि
मं प्रबंधमादरणपूर्वकं यः पठति यः शृणोति श्रावयति वा सोयमेव परमात्मनः उपगेयं उपनिषत्सम्यमणि ... सर्वत्र व्यापमेत्व
भावे दिव्यमंगलविग्रहविशिष्टं दिव्यात्मस्वरूपमपि श्रद्धाभक्तिभ्यां विशुद्धबुद्धिर्यस्य तथाभूतः सन्वेद स्थूलरूपज्ञानं सूक्ष्मरूपज्ञान
फलकमित्युक्तं स्थूलरूपज्ञानसंपादकमेतत्प्रबंधपठनादिकं परंपरया सूक्ष्मरूपविषयकज्ञानफलकमित्यर्थः ४१ स्थूलरूपज्ञानस्य सूक्ष्म
रूपज्ञानसाधनत्वमेवाह श्रुत्वेति भगवतः स्थूलसूक्ष्मे उभे अपि रूपे यथावच्छ्रुत्वा गुरुमुखात् सर्वस्थूलरूपे निर्जितमात्मानं चित्तं शनैः
सूक्ष्मं धिया उक्तविधदिव्यात्मस्वरूपविषयकज्ञानात्मकधिया उक्तविधदिव्यात्मस्वरूपे नयेदित्यर्थः एवं समस्तप्रपंचस्यापि भगव

ॐ यएतद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयं वर्णितमादृतः पठति शृणोति श्रावयति स
उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ४१ श्रुत्वा स्थूलं यथा सूक्ष्मं रूपं भगवतो यतिः स्थूले निर्जि
तमात्मानं शनैः सूक्ष्मं धिया नयेत् ४२ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था गीता मया तव
नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ४३ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे षड्विंशोध्यायः २६ ॐ
समाप्तोऽयं पंचमस्कंधः ५ ॥

रूपत्वेनानुसंधानात्कश्चिदपि वा प्रियमाणं चेत् तं भगवत्स्वविशेषाभावे समवस्थितं भवति
इति तस्य तत्साधनत्वमिति भावः ५ किं च भगवतः स्थूलरूपं यथायथमन्वनोच्यते सूक्ष्मापेक्षायामनवद्यं तद्रूपमुपसंहरति भूद्वीपेति
भुवः सद्वीपान्तरभेदाः कांचीपवर्षाणां भेदमिष्ठानां सरितां नदीनां पर्वतानां तथा नभसो नरिक्षस्य समुद्राणां पातालपर्यंतं भूविवराणां
दिशां नरकाणां भागणा लोकस्थानक्षत्रगणलोकस्य ग्रहमंडलस्य च नक्षत्रस्य दीर्घ्यस्य संस्थाः विन्यासविशेषाः हे नृप मया तव तुभ्यं
गीताः कथिताः एतदेव ब्रह्मादिगणलोकपर्यन्तं जगत्सकलजीवसमूहस्य धाम आश्रयभूतस्य भगवतः अद्भुतं विचित्रं स्थूलं वपुः
शरीरं भवतीत्यर्थः ४३ इति श्रीभागवतटीकायां पंचमस्कंधे षड्विंशोध्यायः २६ ॥ ॥ ॥ ॥ ॥

114